तस्य वचनश्रवणाद्युक्तरूपितं विना कार्यं विज्ञाय भगवान् चिंतयामास। अहो स्थाने कोपाविष्टो वैनतेयस्तात- 111
तस्मात् स्वयमेव गत्वा सम्मानपुरःसरं तमानयामि। उक्तं च। लक्षं शाकं कुलीनं चैनतृक्षक्षुण्णपमानाय 154
तत्पुत्रवल्लालनात्स्निग्धप्रियस्य श्वेतश्च यश्चात्मनः। अन्यच्च। राजा तुष्टोऽपि। इत्येवं संप्रधार्य
रुक्मपुरोवनात्तयसकाशं सत्वरमगम- त्। विनतायाः पितृहायान्तःगतं तमवलोक्य त्रपा-
धोमुखः प्रणम्यावाच। भगवन् चदा- श्रायन्मकेन समुद्रेणमम कृत्यस्य पांडान्यपहृत्याम-
पमानस्थानं दत्तं। परं युष्मल्लज्जयाहं तं- कालं तानानयामि। इत्थितः। स्वामिन वानस्तु
पिप्रसारो मदीयस्ते। उक्तं च। यन स्याल्लघु- ना वाप्यपीडा विना प्राणा ते वता। प्राणत्यागेऽपि तं
मन्त्रकार्यकुलसेवकः। तच्छ्रुत्वा भगवाना- ह। भो विनतायस्य सत्यमभिहितं त्वया। उक्तं च।
त्वापराधजो दंडः स्वामिना ज्ञातव्यतां। ततलङ्का पितस्यो स्वातत्वं तस्य यथा पुत्र तदा गच्छ। य-
नांडानि समुद्रादादाय टिट्टिभं संभावयामः। अमरावतीं गरुडः। तया वोहितः समुद्रो भगवता
निर्भर्त्स्य। अयं शरं संधायाभिहितः। भो दुरात्मन् टीयतां टिट्टिभांडानि। नो चेत् स्थलतां नयामि।

…वास्वा॰ ततः समुद्रेण सत्त्वेन टिट्टिभाण्डानि तानि निवेद्य । टिट्टिभेनापि भार्यायै समर्पितानि । अतोऽहं ब्रवी
मि । शत्रोर्बलमविज्ञायेति । तस्मात्पुरुषेण उद्यमो न त्याज्यः । तदाकर्ण्य तां संजीवकस्तमेव भूयोऽपि
पप्रच्छ । भो मित्र कथं ज्ञेयो मम मासौ दुष्टबुद्धिरिति । स आह एतत्कालं यावत्स्वनरस्नेहेन प्रसादेनाहं
दृष्टः न कदाचित्सद्बुद्धिर्निर्दिष्टा । न कथ्यमानं ये नास्मा स्मर स्वार्थं तदध्याय त्वयातो नहि किमत्राद्य
थोपायः प्रत्ययः । यदि रक्षा न स्निग्धा । स्वांगूल कटिं दधानः पुच्छिणी परिलेलिहन्नुपाद
दृष्टो भवति । तद्दुष्टबुद्धिरन्यथा सुप्रसा दास्य तीति दाक्षापयमो यथाऽश्रयं प्रतिगिरामि
चया वयथायं मंत्रात्तदा न भवति तथा वकार्यं यदि निशा सुखं प्राप्नुगुंतु शंको पि नेह
शत्यागः कार्यः । यतः । त्याज्यादेकं कुलं । स्वार्थे ग्राम स्वार्थे कुलं त्यजेत् । ग्रामं जनपदस्यार्थे
आत्मार्थे पृथिवीं त्यजेत् । आपदार्थं धनं रक्षेद्दारान्रक्षेद्धनैरपि । आत्मानं सततं रक्षेद्दारैरपि ध
नैरपि । बलवतानि तु तस्य विदेशगमनं जदत्तु प्रवेशा वानीतिः । तादृशात्यागः कार्यः । अथ वान्या
सामादिभिरुपायैर्निरस्तृणीयः । उक्तं च । अपि पुत्रकलत्रैर्वा प्राणान्रक्षेत पण्डितः । विद्यमानि ५२

यैतास्तैः स्यात्सर्वं भूयोऽपि देहिनां । तथा चाप्येनकेनाप्युपायेन प्रयत्नेन वा । उद्धरेद्दीनमा
त्मानं समर्थो धर्ममाचरेत् । यो मायां कुरुते मूढः प्राणत्यागं धनादिकां तस्य प्राणाः प्रनश्यन्ति तैर्नष्टैर्न
ष्टमेव तत् । एवमभिधाय दमनकः करटकसकाशमगात् । करटकोऽपि तमायान्तं दृष्ट्वा प्रोवाचाप
द्र किं कृतं तत्र भवता । दमनक आह मया तावत् नीतिबीजनिर्वापणं कृतं परतो दैवविहितायत्तं । उ
क्तं च । यतः । पराङ्मुखेऽपि दैवेऽत्र कृत्यं कार्यं विपश्चिता । आत्मदोषविनाशाय यत्नं वितन्वता
यत्नात्तथा च । उद्योगिनं पुरुषसिंहमु पैति लक्ष्मीर्दैवं हि दैवमिति कापुरुषा वदन्ति
दैवं निहत्य कुरु पौरुषमात्मशक्त्या यत्ने कृते यदि न सिध्यति कोऽत्र दोषः । करटक आ
ह । तत्कथय । त्वया कीदृक्कृतं नीतिबीजं निर्वापितं । सोऽब्रवीत् । मयान्योन्यं मिथ्या संकल्पनेन द
था विहितो यथा भूयोऽपि मंत्रयन्तौ वा कस्थाने स्थितौ न पश्यसि । करटक आह न युक्तं भव
ता विहितं । यत्परस्परं तौ स्नेहार्द्रहृदयौ सुखाश्रयौ कोपसागरे प्रक्षिप्तौ । उक्तं च । अविरुद्धं
सुखस्थं यो दुःखमार्गे नियोजयेत् । जन्मजन्मानि नरो दुःखी स नरः स्यात्संशयः । अपरं त्वं य

113
1954

पं॰ख्या॰ तस्तिदमीत्रणा। पितुश्छद्मदप्युत्तं। यतः सर्वेऽपि ज्ञाना विरूपकरणसमर्था भवंति। नापकर्तुंउत्कर्तुंच॥
घातयितुमसमर्थो व परकार्यविनाशनसमर्था भवंति। प्रातयितुमसवशाक्तिना खलकृदनुं। मत्रापि टिट्टिभेन
अनुत्तिज्ञात्वा ननीतिशास्त्रमपेतैस्तितसमुद्रेणपितवत्। यतः जातमात्रं न यः शत्रुं व्याधिं व प्रशमं नय
त। महाबलोऽपि तेनैव वृद्धिं प्राप्य स हन्यते। ततः शत्रुहंतोऽस्य मम स्वामिकंमंत्रिपदा पकारणात। उक्तं
च। पित्र्यपितामहंस्थानं यायस्यात्रजिगी। षातासमस्य सहजः शत्रुरुच्छ्रयोहिप्रियस्थितः।
तन्मया समुद्दिश्य न तया समानीतः। नयप्रवानयावत्। तावदहमपि तन्नीत्या
व्यापाद्याविताः। अथवा माछिद्रं लप्यते॥ दृष्ट्वात्मा धुर्यदिनिजपादुर्जनाव्यर्थवेशतत्रा
ज्ञातव्यमस्तकतितनेवाबमानः ध्वंसः। तस्मा द्वियारिपुलमति चित्तर्वकार्यार्थमानेनारा। पिस्य
ज्ञानपवितिविधूतवाक्यातोऽत्र। तन मयास्यापरिवर्धपावणपाविरव्यातादशास्यागाढवात
वितृनितनक्षत्रसंज्ञाता न्यानशास्यति। तद्युक्तामनवद्या पर्यायातुष्टितं। उक्तंवा। यतः। निश्चयेशाद
दयेदेवा। देवालि। वक्रुरसोपमा। कः रवंतत्र न कर्तव्यं हन्यात्र आपकारिणां। अपरं शृगालः पस्य

स्म। कोऽसौ आत्मविद्यति। तदेकानावेढिर साधना। अपरं स्माविष्यं वनविष्याति। कृमि त्रिपुता। तदुपात्रप
यः स्मिम्नुपस्थिता तत्कस्मान्मोऽपष्यसिंहं। जात्वस्थाना। तवा। उक्तंवा। परस्यपीडनेऽर्थ ह्यार्थासिद्धिंव
पमितः। मृदवृक्षिनलिहतवेनवदुरंकोयथा। करटकः। कथमेतत्। स आह। अस्ति कस्मिंश्चि
स्मविने। हशेवद्दात्राद्नाम सिंहः। त स्यवशुरकः ककव्यसुरवनामतौ शृगालौ सदानुगा
तौ तंत्रिवप्रतिवसतः। अथान्यदिने सिंहेनकदाचिदासन्नप्रसवाप्रसववेदनया
आर्थाद्रूष्ट्रावष्टौ उपविष्टा कस्मिं श्चिद्दानाद्विगीसमासादिता। अथतोव्यापा
घयाश्चुदरं स्फाटयतिमानवतजीव नूलघुदासरकशिशुर्निःक्रांतः। सिंहोऽपि सम
स्कंधः पिसितनसपरिवारः परांतृप्ति मुपागतः। अपरं तस्मास्मद्वासरकोऽयस्मानीयद
त्तेवाव। नदनातः। शिशुरत्वादौ ज्यमात्राप्रन्यस्मादपि नतत्रास्थवध्या त्रवालत्वात्सततामितिमय
तेस्वशोऽकुः सहचिरोऽकस्मि। अतः शोकुक्वर्णो नाम तव विष्यसि। एवमसृष्टितवत्था। ताऽपितए
कस्थानविहारिणः परस्परं आलंकप्रकीरणाष्टौ सुखमनुभवंत। शिशोऽलि। शोकुकस्मिस्थिपितया।

115
1954

पंचाख्या.॥ वनमुद्दिश्य माद्दवो मनंतरुणामपि भिंदसुंवति। अथ कदाचिद्वज्रदंष्ट्रस्य केनचिद्वनगजेन सह युद्ध
मभवत्। तेन तस्य दीर्घदंतप्रहारैर्व्यथा॥ शरीरं विदारितं। यथा स्खलितुं न शक्नोति। ततः क्षुत्क्षाम
कंठः प्रोवाच। भो अन्विष्यतां किंचित्सत्वं। येनाहमेवं स्थितोऽपि तद्व्यापाद्य आत्मनो युष्माकं च क्षुत्प्रणाशं
करोमि। तत् श्रुत्वा ते चत्वारोऽपि वनं संध्याकाल पर्यंतं भ्रांताः। परं न किंचित्सत्वमासादितं। अथ चतुरक
श्चिंतयामास। यदि शंकुकर्णोऽयं व्या पाद्यते। ततः सर्वेषां कतिचिद्दिनानि तृप्तिर्भवति। परं
नैनं स्वामी आश्रयसमाश्रितत्वाद्वि नाशयिष्यति। अथवा बुद्धिप्रभावेन स्वामिनं प्र
तिबोध्य तथा करिष्ये यथा व्यापादयिष्य ति। उक्तं च। अवध्यं वाथवागम्यं अकृत्यं नास्ति किंचन
। लोके बुद्धिमतां बुद्धेस्तस्मात्तां विनियोजये त्। एवं विचिंत्य शंकुकर्णमिदमाह। भोः शंकुकर्ण स्वा
मी तावत्पथ्यं विना क्षुधया पीड्यते। स्वाम्यत्यागादस्माकमपि ध्रुवं विनाश एव। ततो वाक्यं किंचित्स्वा
म्यर्थे वदिष्यामि। तच्छ्रूयतां। शंकुकर्ण आह। भोः शीघ्रं निवेद्यतां। येन तव वचनं शीघ्रं निर्विकल्पं क
रोमि। अपरं स्वामिनो हिते कृते मया सुकृतं कृतं भविष्यति। अथ चतुरक आह। भोः भद्र आत्म ५३

शरीरं द्विगुणलाभेन प्रयच्छ स्वामिने। येन ते द्विगुणं शरीरं भवति। स्वामिनः पुनः प्राणयात्रा भवति। तदाकर्ण्य शं
कुकर्ण आह। भद्र यद्येवं तन्मदीयप्रयोजनमेतदुच्यतां। स्वाम्यर्थः क्रियतामिति। परं अत्र धर्मः प्रतिभू
रिति। विचिंत्य सर्वे सिंहसकाशमाजग्मुः। ततश्चतुरक आह। देव न किंचित्सत्वं प्राप्तं। भगवानादित्यो
ऽप्यस्तंगतः। तद्यदि स्वामी द्विगुणं शरीरं प्रय च्छति। ततः शंकुकर्णोऽयं द्विगुणवृद्ध्या स्वशरीरं प्र
यच्छति। धर्मप्रतिभुवा॥ सिंह आह। भोः य द्येवं तत्सुंदरतरं। व्यवहारस्यास्य धर्मः प्रतिभूः
क्रियतामिति। अथ सिंहवचनानंतरं वृकशृगालाभ्यां विदारितोभयकुक्षिः शं
कुकर्णः पंचत्वमुपगतः। अथ वज्रदंष्ट्रश्च तुरकमाह। भो चतुरक यावदहं नदीं गत्वा स्ना
नदेवतार्चनविधिं कृत्वा आगच्छामि। तावत् . अत्राप्रमत्तेन त्वया स्थातव्यमित्युक्त्वा नद्यां गतः। अथ त
स्मिन् गते चतुरकश्चिंतयामास। कथं ममैकाकिनोऽयमुष्ट्रो भोज्यो भविष्यतीति विचिंत्य क्रव्य
मुखमाह। भोः क्रव्यमुख क्षुधालुस्त्वं तावत् यावदसौ स्वामी नागच्छति। तावदस्योष्ट्रस्य मांसं भ
क्षय। अहं त्वां स्वामिनो निर्दोषं प्रतिपादयिष्यामि। सोऽपि तच्छ्रुत्वा यावत्किंचिन्मांसमास्वाद

117

यतितावद्वत्सरकेणोक्तं। ततोऽकस्मात्स्वस्थानमागच्छतिश्यामी। तच्छ्रुत्वा एनं दूरान्निरीक्षितेनास्कंद
णं विकल्पयति। तथा चोक्तं। विसिंदुःसमा। पुत्रो या वडूं पश्यति। तावेदिक्रीडन्तहृदयो दासेर
कः। ततो दृष्ट्वा कटिं कृत्वा पुरुषतरमाह। अरे। कोऽसि पञ्चजनैः शिष्टेनानीतः। एनं तु मपि व्यापादया
मि। एवमतिश्चिन्तेन क्व खस्तुखश्चरत्वरकमुख मवलोकयति। किं तत्र दृष्टं किं चिन्तयेनममशोणि
तं वमि। एवमति दृष्ट्वेन दासेरकावित्स्य वाचा। तो मामनाहत्यपि गिलितं पश्यति वाधुना
मन्मुखमवलोकयसि। तदा ब्रावश्य स्याद्दुर्नयतारः फलमिति। तदा सौ करुणं
करुणं कं खीजीवनाशात्तया दूरदेशं गतः। एतस्मिन्नंतरे मार्गेण दासेरकैः कसार्थ्य
त्ताराक्रांतः समायातः। तस्याग्रे सरो दुस्पकं ठिमहती घंटा बद्धा। तस्याः शब्दं दूरात्प्रत्याक
र्ण्य सिंहो जंबुकमाह। तद्ज्ञायतां किमेष रौद्रः शब्दः श्रूयते। श्रुत्वा सर्वः। तच्छ्रुत्वा वत्सकश्चि
त्कमपि वनांतरं मत्वा रमस्वा एत्य प्रोवाच। स्वामिन्नु गम्यतां शीघ्रं दिशः कोपितं। सोऽब्रवीत्। तद
किमेवं व्याकुलो हृदयोऽसि। तत्कथय। रक्कि मनदिति। वत्सरक आह। स्वामिन्नेतद्धर्म जसो वा प

रिकुपितः। यदनेन तावकालेदासेरकोऽयं मदीयो व्यापादितः। मत्तु सच मनुष्ठाज्ञं निर्वत्रक्रि नभतुम
हं प्रतिज्ञा मुष्टमस्य सकाशाद्ग्रहीष्यामीति। तिष्ठेत्प्रहृष्टमानमादाय अग्रेसरस्याह सोग्रीवाग्रबं
टाबद्धा वध्यदासेरकसकाशान पिपितृपितामहानादायैव निवर्तितार्थमाया। तत्र एवं सिंहाः पितृ
तच्छ्रुत्वा सवीनाहूराद्देवावलोकमृतस्य हं परित्यज्य प्राणे तयास्त्रनष्टः। सूत्रधारकोऽपि शतिः
रतस्या क्षुस्य मांसं तत्कृत्य मांसाः श्रुतो हं ब्रवीमि। परस्य पीडनेन कुर्वत इति। अथ दमन
केनात्संजीवककष्टिनया मास। अहा। किमेतन्मयाकृतं। यत्तु त्रिपादाः पिशं
सांखितस्येस्य जगः संत्रन्नः। अथवा सा। द्दिदस्तुच्यते। अगम्यानयः शमानयातिशसे
वां च तिषवाः। समृत्फसूपस्पृक्कातिगर्त मश्चतरी यथा। तत्किं करोमि क्व गच्छामि कथं म
यां तिरिविष्यति। अथवा नामवपिंगलकं गच्छामि। कदाचित्मो शरणागतं रक्षति। प्राणैर्न विये
जयति। यतः उक्तं वा धर्मार्थे यत्तेनाम स्वप। विपदादि वाद्धि रिस्फः क्षुवितस्रनासा पर्वशातय
स्तुमतिनिः कार्यविशेषाचें लो करस्या निरूपा गतानु सकल्वेलो को क्रिरषा लादग्ध

119/1954

पंचाख्या० ॥

यांयां तिमक्षु वितानरं इणनवो षधम्मनमूर्यिणनवक्लिनासोम्नेव विलयं याति विंहोषिप्रलबंधमः। तथा
यतंन्नंमंत्रिपदमसिलषसि। तमाय्युक्तं। यस्मनं मंत्रग तिनाव स्ति। यतापंव विक्षमंत्रब्र:। सव कर्मणा
मारोत्तापायः पुरुषद्व्यसंपतादेशकालविभागाविनिपातप्रतीकारःकार्यसिद्धिरिति।। सोऽयं
घा मध्यमा त्यायाः रकतमस्य किं वा ह्यस्यामपि। विनिपातःमसुच्यतलमः। उक्तंच। मंत्रिणांतिलसं
[illegible]पजां मा निपातके। कर्मणि व्यज्यते प्रज्ञा बुद्धिको वा न पंक्तितः। नत्स्पर्षीवितनकं तुमि
मर्थम्भु। उक्तंच। घातयित्वे मे वनीवः प रक्तायीवत्विनप्रसाधयित्वापातयित्वमव
शक्तिरावोस्फद्वत्तुमवपिटिं। अथवानत दोषोऽयंस्त्रामि तादोषः। यस्त्रवाक्यग्रहधाति
उक्तंच। नराधिपानीवजनानुवर्त्तितानुधे पदिष्टेननयांतिय पथ्या। विरूंस्पतीऽर्गममार्ग
ममार्गनिर्गमंसमास संबाधमनर्थपंजरं। तद्यदिचमस्य मंत्रीन विष्मसि। तदाज्ञायिनः प्यस्यस
मीप्यसाधुजनो नसेमस्पति। उक्तंच। गुणालयोऽप्यसन्मंत्री नृपतिर्नोधिगम्यते। प्रसन्नस्वाद्वस
लिलो दुष्टग्राहो यथा हृदः। तथा शिष्टजनैरहितस्पष्टा मिनाऽपि नाशोऽत विष्यति। उक्तंच। वित्र

५५

ह्यादक्लाथ्य रं त्पिरनायासिनकार्मुकैः। यरमंतनृपास्तेषांरमंतरिपवःश्रियं। तत्किंमूर्षोपदे
शेन्किवलादोषानगुणाः। उक्तंच। नानाम्यनमतेदारुनाश्मनिस्याद्गुरुक्रिया। एवंबोध्यतेवि
जानीहिनाशिष्यायोपदिश्यते।। दमनक आह। कथमेतत्। सोऽब्रवीत्। अस्ति कस्मिंश्चित्पर्वत
केदेशे वानरयूथं। तच्च कदाचिद्धेमंत समयेऽतिकोप्यवातसंस्पर्शकलेवरंघनवर्षति घनसम
रानिपातसमाहतंन कथंचित् शांतिम गमत्। अथ केचिद्वानरा वह्निकणसदृशानि
गुंजाफलानि विचित्य वह्निवांछया फूत्कुर्वंतः समंतात्तस्थुः। अथ सूचीमु
खपक्षी तेषां तं वृथायासमवलोक्य प्रोवाच। भो सर्वे भवंतः सर्वे मूर्खतमाः। नैतेव
ह्निकणाः। वह्निकणसदृशानि गुंजाफलानि तत्किं वृथाश्रमेण। नैतस्मात्शीतरक्षा
भवति। तदन्विष्यतां कश्चिन्निवातो वनप्रदेशः। गुहा वा गिरिकंदरं वा। अद्यापि सोदापामेघा
दृश्यन्ते। अथ तेषामेकतमो वृद्धवानर[illegible]वाच। रे मूर्ख किं तवानेन व्यापारेण। तद्गम्यतां। उ
क्तं च। मुहुर्विघ्नितकर्माणं द्यूत[illegible]पराजितं। नालापयेद्विवेकज्ञो य इच्छेत्सिद्धिमात्मनः।

123
1954

याo॥

।तथा च। आखेटकं दृष्टा हि ... सूर्यं व्यसनेन संस्थितं। समालापेन योयं कस्मगस्वतिपरान्तवे।
स्मा: पिमेनादृस्यपत्र्या: पिवानरानवं ... माह। अथ यावदसौ प्रलपन्न किंचित विरम
तितावदेकेन वानरेणाभ्यर्षिसमचानुकुपितेन पक्षौ संगृहीत्वा शिलायामास्फालितउपर
तश्च। अतोहं ब्रवीमि। नानास्यनमातदारु   इत्यादि। तथा च। उपदेशो हि मूर्खाणां प्रकोपाय
न शांतये। पय: पानं भुजंगानां केवलं।   विषवर्द्धनं। उपदेशो न दातव्यो यादृशो तादृ
शे जने। पश्य वानरमूर्षेण सुगृहीनि   गृहीकृता॥ दमनक उ० कथमेतत्। सोब्र
वीत्। कस्मिंश्चिद्वने शमीवृक्षशाखालंबि   तवसथं कृत्वा अरण्यचटिकादंपती प्रतिव
सतिस्म। अथ कदाचित्तयो: सुखसंस्थयो:   हेमंतमेघो मंदं वर्षितुमारब्ध:। अत्रांतरे क
श्चित्शाखामृगो वातासारसमाहत: प्रोद्धुषितशरीरो दंतवीणां वादयन् वेपमान: सन्त: शम्या:
मूलमासाद्योपविष्ट:। अथ तं तादृशमवलोक्य चटिका प्राह। भो भद्र। हस्तपादसमायुक्तो दृश्य
से पुरुषाकृति:। शीतेन भिद्यसे मूढ कथं न कुरुषे गृहं॥ एतच्छ्रुत्वा वानर: सकोपमाह यद् ५६

कस्मान्निभृता न भवसि। अहो धार्ष्टमस्या:॥ अथ मामुपहससि। सूचीमुखि दुराचारे दुरा 125
चारे पंडितवादिनि। नाशंकासे प्रजल्पंती तत्किमेनां न हन्म्यहं॥ अथैवं तं प्रलप्य स्यापुपरिएवं 1954.
प्रलप्य तामाह। मुग्धे किं ममोपरि चिंतया। उक्तं च। वाच्यं श्रद्धासमेतस्य पृच्छतश्च विशेषत:। प्रो
क्तं श्रद्धाविहीनस्य अरण्यरुदितोपमं। तत्किं   बहुना। तावत्कुलायस्थितया तया पि हिता
यावत्तावच्छमीमारुह्य तं कुलायं शतधा   ध्वस्तं गमनयत्। अतोहं ब्रवीमि। उपदेशो
हि मूर्खाणामिति। करटक उ०। तन्मूर्खाशि   ष्यापि त्वया पिन शिक्षितं॥ अथवा नैतद्दोषो
अस्मिन्न्दंत: साधव: शिष्या: गुणा: संपद्यतेन्ता   साधव:। उक्तं च। किं करोत्येव पांडित्यमस्था
ने विनिवेशितं। अंधकारप्रतिच्छन्ने घटे दीप इवाहित:॥ तद्व्यर्थपांडित्यं च मामाश्रित:॥ मम व
चनमश्रृण्वन्नात्मन: शांतिमपि न वेत्सि। उक्तं च। अप्यात्मनो विनाशं गणयति न खल: परव्य
सनसंहृष्ट:। प्रायः मस्तकनाशे समरमुखे नृत्यति कबंध:॥ आ: साधु चेदमुच्यते। धर्मबुद्धि: कुबुद्धि
श्चद्वावेतौ विदितौ मम। पुत्रेणात्यर्थपांडित्यात्पिता धूमेन घातित:॥ दमनक उ० कथमेतत्। सोब्रवी

पंचाख्यान

त॥ अथ कस्मिंश्चिदधिष्ठाने धर्मबुद्धिः पापबुद्धिश्च द्वे मित्रे प्रतिवसतः। अथ कदाचित्पापबुद्धिना चिंति
तं। यदहं तावन्मूर्षो दरिद्रोपेतश्च। तदेनं धर्मबुद्धिमादाय देशांतरं गत्वा अस्याश्रयेणार्थोपार्ज
नं कृत्वा एनमपि वंचयित्वा सुखी भवामि। अथान्यस्मिन्नहनि पापबुद्धिर्धर्मबुद्धिं प्राह। भो मि
त्र वार्द्धके किं त्वमात्मनश्चेष्टितं स्मरिष्यसि। देशांतरमदृष्ट्वा कां शिशुजनवार्तां कथयिष्य
सि। उक्तं च। देशांतरेषु बहुविधभाषावेषादि येन न ज्ञातं। भ्रमता धरणीपीठे तस्य फ
लं जन्मनो व्यर्थं। तथा च। विद्यां वित्तं शिल्पं तावन्नाप्नोति मानवः सम्यक्। यावद्व
जति न भूमिं देशाद्देशांतरं हृष्टः। अथ तद्वचनमाकर्ण्य प्रहृष्टमनास्तेनैव सह गुरुज
नानुज्ञातः शुभेऽहनि देशांतरं प्रस्थितः। तत्र च धर्मबुद्धिप्रभावेन भ्रमता पापबुद्धिना प्र
भूततरं वित्तमासादितं। ततश्च तौ द्वावपि प्रभूतोपार्जितवित्तौ प्रहृष्टौ स्वगृहं प्रति औत्सुक्येन नि
वृत्तौ। उक्तं च। प्राप्तविद्यार्थशिल्पानां देशांतरनिवासिनां। क्रोशमात्रोऽपि भूभागः शतयोजनवा
द्भवेत्। अथ स्वस्थानसमीपवर्तिना पापबुद्धिना धर्मबुद्धिरभिहितः। भद्र न सर्वमेतद्धनं गृहं प्रतिन ५८

वं युज्यते। यतः कुटुंबिनो बांधवाश्च प्रार्थयिष्यंति। तदत्रैव वनगहने क्वापि भूमौ निक्षिप्य किंचिन्मा
त्रमादाय गृहं प्रविशावः। भूयोऽपि प्रयोजने संजाते तन्मात्रं समेत्यास्मात्स्थानान्नेष्यावः। उक्तं
च। न वित्तं दर्शयेत्प्राज्ञः कस्यचित्स्वल्पमप्यहो। मुनेरपि यतस्तस्य दर्शनाच्चलते मनः। तथा च। य
थामिषं जले मत्स्यैर्भक्ष्यते श्वापदैर्भुवि। आकाशे पक्षिभिश्चैव तथा सर्वत्र वित्तवान्। तदाकर्ण्य
धर्मबुद्धिराह। भद्र एवं क्रियतां। तथानुष्ठिते तौ द्वावपि स्वगृहं गत्वा सुखेन स्थितवंतौ। अ
न्यदा च पापबुद्धिर्निशीथे तत्रागत्य सर्वं वित्तमादाय गर्तं पूरयित्वा स्वभवनं जगा
म। अथान्येद्युर्धर्मबुद्धिं समभ्येत्य प्रोवाच। सखे बहुकुटुंबा वयं वित्ताभावात्सीदामः। त
द्गत्वा तत्र स्थाने किंचिन्मात्रं धनमानयावः। सोऽब्रवीत्। भद्र एवं क्रियतामिति। अथ द्वावपि गत्वा यावत्
स्थानं खनतः तावद्रिक्तं भांडं दृष्टवंतौ। अत्रांतरे पापबुद्धिः शिरस्ताडयन्प्रोवाच। भो धर्मबुद्धे त्व
या हृतमेतद्धनं नान्येन। यतो भूयोऽपि गर्तापूरणं कृतं। तत्प्रयच्छ मे तस्यार्द्धं। अथवाहं राजकु
ले निवेदयिष्यामि। स आह। भो दुरात्मन् मा मैवं वद। धर्मबुद्धिः खल्वहं। नैतच्चौरकर्म करोमि।

127 / 1454

याख्या ॥ ॥ उक्तं च ॥ मातृवत्परदाराणि परद्रव्याणि लोष्टवत् । आत्मवत्सर्वभूतानि यः पश्यति स पश्यति । एवं तेनो
वापि विवक्ष्माणि धर्माधिकारिणा गतवंतो । प्राङ्गः एरस्यं रूपं पश्यंतो । अथ धर्माधिकारणाधिष्ठितभूस
षु दिव्यार्थयावन्नियोजितौ । तावत्पापबुद्धिराह । आं ज्ञानं सम्यक्दृष्टो न्यायः । उक्तं च । विवादेषु
क्ष्प छ्यो न पदं पत्रात्तावत्साक्षिणः । साक्षितावत्र नो दिव्यं प्रवदंति मनीषिणः । अत्र विषये मम वृक्षदेव
ताः साक्षिभूताः संति । तस्मादेव आवयोर कतमं चौरं वा साधुं करिष्यंति । अथ तैः सर्वैरभिहि
तं । नो युक्तमुक्तं भवता । उक्तं च । अन्त्य जोऽपि यत्र साक्षी विवादे संप्रजायते । न तत्र विद्य
ते दिव्यं किं पुनर्यत्र देवताः । तदस्माकमप्य त्र विषये महत्कौतूहलमस्ति तत्प्रभाते सूर्ये समेयिद्धा
तत्र स्माभिः सहागत्य वनोद्देशे गंतव्यमिति । अ थ पापबुद्धिः स्वगृहं गत्वा स्वजनकं वाचानान्न प्रष्टतो ।
यं मयार्थो धर्मबुद्धेश्चोरितः । स च तत्र विवादेन परिणतिं यास्यति । अन्यथा मम प्राणैः सह यास्यति ।
स प्राह । वत्स कृतं वद । यत्नेनामुतद्रव्यं स्थिरतां नयामि । पापबुद्धिराह । तात अस्ति तत्प्रदेशे महाशमी
तस्यां महत्कोटरमस्ति । तत्र त्वं सांप्रतमेव प्रविश । ततः प्रभाते यदा सत्यश्रावणं करोमि तदा त्वया वा । ॥५॥

च्यं । यत्नु धर्मबुद्धिश्चौर इति । तथानुष्ठिते प्रत्यूषे पापबुद्धिः स्नात्वा धर्मबुद्धिपुरःसरो राजकुलपुरुषैः सह तां श 129/1954
मीमभ्येत्य तारस्वरेण प्रोवाच । आदित्यचंद्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च । अहश्च रात्रि
श्च उभे च संध्ये धर्मो हि जानाति नरस्य वृत्तं । तत्कथयत भवत्यो देवताः । आवयोश्चौर इति । अथ पाप
बुद्धिपिता शमीकोटरस्थः प्रोवाच । भो धर्म बुद्धिना हृतमेतद्वित्तं । तदाकर्ण्य सर्वे राजपुरुषा विस्म
योत्फुल्ललोचना यावद्धर्मबुद्धेर्वित्तहर णाय वित्तनिग्रहं दृशा । अत्र हृष्टा अवलोकयंति । तावत् ध
र्मबुद्धिना तत्तच्छमीकोटरं वह्निपाताद्य इन्धनैः परिवार्य वह्निना संदीपितं । अथ ज्वलति
तस्मिन् शमीकोटरे अर्धदग्धशरीरः स्फुटि तेक्षणः करुणं परिदेवयन् पापबुद्धिपिता निश्चक्रा
मा ततस्तैः सर्वैः पृष्टः सर्वं पापबुद्धिविचेष्टितं नि वेदयामास । अथ ते राजपुरुषाः शमीशाखायां पाप
बुद्धिं प्रतिपाद्य धर्मबुद्धिं प्रशस्य इदमूचुः । अथ साधु चेदमुच्यते । उपायं चिंतयेत्प्राज्ञस्तथापायं च चिंतयेत् । पश्यतो बक
नकुल २ मूर्खस्य नकुलेन हता बकाः ॥ दमनक आह । कथमेतत् । सोऽब्रवीत् । अस्ति कस्मिंश्चिद्वने बहुबकसनाथ
वटपादपः । तस्य कोटरे कृष्णसर्पः प्रतिवसति स्म । स च बकबालकानजातपक्षानपि सदैव भक्षय

नूं कालं नयतीति। अस्ति कोपि बको तद्वृक्षशिखोर्विरागपात् सरस्तीरमासीद्धवा ध्यप्रस्तुतुस्तु तनो अन्या
ऽधिगृह्य स्वस्मिष्ठति। तेन तान्हका वटिन मवलोक्य जलीरकं प्रवावा मामकि मेवं कृत्यासत्वता हो। म
आह। तद् किं करोमि। मम मंद भाग्यस्य बालकाः कोटरनिवासिना सर्पेण तद्धिताः। दुःखितोऽहं तदु
विनात कथयाम्यय ग्रस्मिकाष्ठि उपाय श्वदि नाशाय। तदा कस्य जलीरकश्चिंतयामास। अयं ताव
दस्मज्जसजविरी। तथोपदेशं श्वयत्वामि स। त्याहतं। यथान्योपि बकाः सर्वे संहरयमायांतीति। उ
क्तं वा नवनीतसमां वाणीं कृत्वा चित्तं तु निर्दयं। तथा प्रबोध्यते शत्रुः सान्वयो म्रियते यथा।
याह। आह च। मामयाद्यं वा नमकस्य मांसशकलानि नकुलस्य सर्पकोटरं यावत् प्रक्षिपा यथान
कुलस्तन्मार्गेण मत्वा तं दुष्टं सर्पं विनाशयति। अथ तथानुष्ठिते मत्स्यमांसानुसारिणा नकुलेन
तं कृष्णसर्पं निहत्य समीपवर्तिवृक्षाश्रयाः सर्वे बकाः शनैः शनैः भक्षिताः। अतोऽहं ब्रवीमि। उपायं चिंतये
दितितदेतेन पापबुद्धिना उपायश्चिंतितो नापायः। तस्य प्राप्तं फलं। एवं मूढ त्वयापि उपायश्चिंति
तो नापायः पापबुद्धिवत्। तन्न वा मित्रं सज्जनः। केवलं पापबुद्धिरसि। ज्ञातो मया स्वामिनः प्राणसंदे 60

हनयनात्। प्रक्रीडसंचयाद्वयमेवात्मनो दुष्टत्वं कौटिल्यं वा अथवा साधुरस्तु व्यात। यत्नाः परिक्ष्यः।
पंडिपतां ज्ञेखिना मा वारनिःसरणमार्गा। यदि जलदध्वनिमुदिता मयूरा वसुधा नश्वल्पद्युः। तद्यदि त्वं स्वा
मिनं तानं दर्शयसि। न दस्मद्विधस्य कागणना। तस्मान्ममा सन्निन नसावकं। उक्तं च। तुलां लोहसहस्र
स्य यत्र खादंति मूषकाः। राजन् तत्र हरेत् श्येनो बालकं नात्र संशयः। दमनक उवाच॥ कथमेत
त्। सोऽब्रवीत्। अस्ति कस्मिंश्चिदधिष्ठाने जीर्णधनो नाम वणिक्पुत्रः। स च द्रव्यक्षयात् दे
शांतरगमनमनाश्चिंतयत्। यत्रा दे शे यथा स्थाने भोगान्भुक्त्वा स्ववीर्यतः। त
स्मिन्विभवहीनो यो वसेत्स पुरुषाध मः। तथा च। येनाहंकारयुक्तेन चिरं विलसितं
पुरा। दीनं वदति तत्रैव यः परेषां स निंदितः॥ तस्य च गृहे लोहभारघटिता पूर्वपुरुषोपार्जिता
तुला आसीत्। तां च कस्यचिच्छ्रेष्ठिनो गृहे निक्षेपभूतां कृत्वा देशांतरं प्रस्थितः। ततः सुचिरं कालं
देशांतरं यथेच्छया भ्रांत्वा पुनः स्वपुरमागत्य तं श्रेष्ठिनमुवाच। भोः श्रेष्ठिन् दीयतां मम सा निक्षेपतुला।
स आह। नास्ति। त्वदीया तुला मूषकैर्भक्षिता। जीर्णधन आह। भोः श्रेष्ठिन् नास्ति दोषस्तव

131 / 1954

132
1854

।वाखा॰ दिग्भूषकैर्भक्षिता इति। ईदृगेव संसारः। न किंचिदत्राश्चर्यमस्ति। परमहं नद्यां स्नानार्थं गमिष्या
मि। तत्त्वमात्मीयं शिशुमेनं मया सह स्नानोपकरणहस्तं प्रेषयेति। सोऽपि चौर्यभयात्तस्य शंकितः।
स्वपुत्रमुवाच। वत्स पितृव्योऽयं तव स्नानार्थं नद्यां यास्यति तद्गम्यतामनेन साकं स्नानोपकरणमादाये
ति। अहो साध्विदमुच्यते। न भक्त्या कस्यचित्कोपि प्रियं प्रकुरुते नरः। मुक्त्वा भयं प्रलोभं वा कार्यका
रणमेव वा। तथा च। अत्यादरो भवेद्यत्र का र्यकारणवर्जितः। तत्र शंका प्रकर्तव्या परिणामे
सुखावहा। अथासौ वणिक्शिशुः स्ना नोपकरणमादाय प्रहृष्टमनास्तेनाभ्यागतेन
सह प्रस्थितः। तथानुष्ठिते वणिक् स्नात्वा तं शिशुं नदीगुहायां प्रक्षिप्य तद्द्वारं बृहच्छिलयाऽऽ
च्छाद्य सत्वरं गृहमागतः। पृष्टश्च तेन वणिजा। भो अभ्यागत कथ्यतां कुत्र मे शिशुर्यस्त्वया सह नदीं गत
इति। स आह। नदीतटात्स श्येनेन हृत इति। श्रेष्ठ्याह। मिथ्यावादिन् किं क्वचिच्छ्येनो बालं हर्तुं शक्नो
ति। तत्समर्पय मे सुतं। अन्यथा राजकुले निवेदयिष्यामीति। स आह। भोः सत्यवादिन् यथा श्येनो बा
लं न नयति तथा मूषका अपि लोहघटितां तुलां न भक्षयन्ति। तदर्पय मे तुलां। यदि दारकेण प्रयो ६२

Soonder Mand

1
1953

Ss.c.27

143045
ac

11201

143049

यो ऊनं।। एवं विवदमानौ द्वावपि राजकुलं गतौ।। तत्र श्रेष्ठी तारस्वरेण प्रोवाच।। हो अब्रह्मण्यम ब्रह्म
ण्य।। मम शिशुरनेन विदारणाय कृतः।। अथ धर्माधिकारिणा प्रसृष्टः।। त्वा मसर्पितः। श्रेष्ठिसुतः।। किं क
रोमि। एषणनामनदीतटात् उपानेनापहृतः शिशुः।। ततः क्रुद्धो बालप्रोक्तः।। त्वान सत्यमभिहितं तव
ता।। किं श्येनः शिशुं हर्तुं समर्थो भवति।। स आह।। त्वा। त्वोश्रूयतां मद्वचः। तुलां लोहसहस्रस्य यत्र
खादंति मूषकाः।। राजन् तत्र हरत्यश्येनो बालं काः अविस्मयः।। तौ प्रोक्तः।। कथमेतत्।। ततः श्रे
ष्ठी सभ्यानामादितः सर्वं वृत्तांतं निवे दयामास।। ततस्ते विहस्य द्वावपि तौ परस्परं सं
बोध्य तुलाशिशुप्रदानेन संतोषितौ।। अ तोहं ब्रवीमि। तुलां लोहसहस्रस्येति।। तन्मूर्ख संजीवक
प्रसादमसहमानेन त्वया एतत्कृतं।। आह।। साधु इदमुच्यते। प्रायेणात्र कुलान्वितं कुकुलजा श्री
वल्लभं दुर्लभाः। दातारं कृपणा ऋजून् ऋजवो वित्तान्वितं निर्धनाः।। विरूप्याः सुरूपाश्च कांतवत्सु षंधम
श्रयं पापिनो नानाशास्त्रविचक्षणं च पुरुषं निंदन्ति मूर्खजनाः।। तथा च। मूर्खाणां पंडिता द्वेष्या निर्धना
नां महाधनाः।। व्रतिनः पापशीलानामसतीनां कुलस्त्रियः।। तन्मूर्ख त्वया हितमप्यहितं कृतं।। उक्तं

3/1953

143145

रवा० वा पंडितोपि वरं शत्रुर्न मूर्षो हितकारकः। वानरेण हतो राजा विप्राश्चौरेण रक्षिताः॥ दमनक आह। क
मनकः॥ कथमेतत्। सोऽब्रवीत्। कस्यचिद्राज्ञो नित्यं वानरोऽतिभक्तिपरोंगसेवकोंतःपुरे
प्यप्रतिषिद्धप्रसरः। अतिविश्वासस्थानमभूत्। एकदा राज्ञो निद्रां गतस्य वानरेण व्यजनं नीत्वा वायुं विदधता
राज्ञो वक्षःस्थलोपरि मक्षिकोपविष्टा। व्यजनेन मुहुः २ निषिध्यमानापि पुनः २ स्तत्रैवोपवि
शति। ततस्तेन स्वभावचपलेन मूर्षेण वानरेण क्रुद्धेन सता तीक्ष्णं षड्गमादाय तस्या उपरि प्रहा
रो विहितः। ततो मक्षिकोड्डीय गता। परं तेन शितधारेणासिना राज्ञो वक्षो द्विधा जा
तं मृतश्च। तस्माच्चिरायुरिच्छता नृपेण। मूर्षोऽनुचरो न रक्षणीयः। अपरमेकस्मिन्नगरे का
ऽपि विप्रो महाविद्वान् परं पूर्वजन्मयोगेन चौरो वर्त्तते। स तस्मिन्पुरेऽन्यदेशादागतांश्चतुरो विप्रा
न् बहूनि वस्तूनि विक्रीयमाणान् दृष्ट्वा चिंतितवान्। अहो केनोपायेनैतेषां धनं लभामि। इति विचिंत्य तेषामग्रेऽने
कानि शास्त्रोक्तानि सुभाषितानि च अतिप्रियाणि मधुराणि वचनानि जल्पता तेषां मनसि विश्वासं उत्पाद्य से
वा कर्त्तुमारब्धा। अथवा साध्विदमुच्यते। असती भवति सलज्जा। क्षारं नीरं च शीतलं भवति। दंभो भवति

६२

विवेकी प्रियवक्ता भवति धूर्त्तजनः॥ अथ तस्य सेवां कुर्वतस्तैर्विप्रैः सर्ववस्तूनि विक्रीय बहुमूल्यानि रत्नानि क्री
तानि। ततस्तानि जंघायां मध्ये तत्समक्षं प्रक्षिप्य स्वदेशं प्रति गंतुमुद्यमो विहितः। ततः स धूर्त्तो विप्र
स्तान् विप्रान् गंतुमुद्यतान् प्रेक्ष्य चिंताव्याकुलितमनाः संजात इति। अहो धनमेतन्न किंचि
न्मम चटितं। अथैभिः सह यामि। पथि क्वापि विषं दत्वा एतान्निहत्य सर्वरत्नानि गृह्णामि। इति विचि
न्त्य तेषामग्रे सकरुणं विलप्येदमाह। भो मित्राणि यूयं मामेकाकिनं मुक्त्वा गंतुमुद्यताः। त
न्मम मनो भवद्भिः सह स्नेहपाशेन बद्धं भवद्विरहेनाप्येव तथाकुलं संजातं य
था धृतिं क्वापि न धत्ते। ततो यूयमनुग्रहं विधाय सहायभूतं मामपि सह नयत। तद्वचः
श्रुत्वा ते करुणार्द्रचित्तास्तेन सममेव स्वदेशं प्रति प्रस्थिताः। अथाध्वनि तेषां पंचानामपि पल्ली
पुरमध्ये व्रजतां ध्वांक्षाः कथयितुमारब्धाः। रे किराता धावत २ सपादलक्षधनिनो यांति। एतान्निहत्य
धनं नयंतु। ततः किरातैर्ध्वांक्षवचनमाकर्ण्य सत्वरं गत्वा ते विप्रा लकुटप्रहारैर्जर्जरीकृत्य वस्त्राणि मो
चयित्वा विलोकिताः। परं धनं किंचिन्न लब्धं। तदा तैः किरातैरभिहितं। भोः पांथाः पुरा कदापि ध्वांक्षवच

5/1953

पा.ख्या० नमस्कृते स्रवति। ततो स्रवतो मन्त्रिणः काणिधनं विद्यते। तदर्पयेत्। अन्यथा सर्वेषामपि वधं विधाय चर्म वि
दार्य। अंगप्रत्यंगं प्रस्फुधनं निष्कामः। तदा तेषामिति वचनमाकर्ण्य विरविप्राणां विद्युषामनसि चिंति
तो यद्वा एषां विप्राणां वधं विधाय अंगं विलोक्य रत्नानि नयिष्यंति। तदापि मां वधिष्यंति। ततो हं पूर्वमा
त्मानं रत्नं समर्पयितानं त्रु वयामि। उक्तं च। मृत्योर्बिभेषि किं बाल न स भीतं विमुंचति। अद्य वा
ब्दशतांते वा मृत्युर्वै प्राणिनां ध्रुवः। तथा च। गवार्थे ब्राह्मणार्थे प्राणत्यागं करोति यः। सूर्यस्य
मंडलं भित्त्वा स याति परमां गतिं। इति निश्चित्याभिहितं भो किरात। यद्येवं ततो मां पूर्वं नि
हत्य विलोकय। तं त्वा ततस्तेन तथा अनुष्ठिते तं धनरहितमवलोक्यापरे चत्वारोपि व्यापादिताः। अतो हं ब्र
वीमि। पंडितोपि वरं शत्रुरिति। अथैवं संवदतोस्तयोः संजीवकः क्षणमेकं पिंगलकेन सह युद्धं कृ
त्वा तस्य खरनखरप्रहाराभिहतो गतासुर्वसुंधरापीठे निपपात। अथ तं गतासुमालोक्य पिंगलकस्त
द्गुणस्मरणार्द्रहृदयः प्रोवाच। भोः अयुक्तं मया पापेन संजीवकं व्यापादयिता। यतो विश्वासघातादं
न्यन्नास्ति पापतरं कर्म। उक्तं च। मित्रद्रोही कृतघ्नश्च यश्च विश्वासघातकः। ते नरा नरकं यांति यावच्चं ६३

द्र दिवाकरौ। तथा मया सता मध्ये सभायां देव प्रशंसितः। तत्किं कथयिष्यामि तेषामग्रतः। उक्तं च।
उक्तो भवति यः पूर्वं गुणवानिति संसदि। न तस्य दोषो वक्तव्यः प्रतिज्ञाभंगभीरुणा। एवं वि
प्रलपंतं दमनकः सामर्षं सहर्षमिदमाह। देव कातरतमस्तवैष न्यायः। यत् द्रोहकारिणं शष्प
भुजं हत्वा एवं शोचसि। तन्नैतदुपपन्नं राज्ञां। उक्तं च। पिता वा यदि वा भ्राता पुत्रो भार्याथवा
सुहृत्। प्राणद्रोहं यदा गच्छेत् हंतव्यो नास्ति पातकं। तथा च। राजा घृणी ब्राह्मणः सर्वभक्षः
स्त्री वा त्रपाढ्या मतिः सहायः। प्रेक्षः प्रातिकूल्यस्थश्च कृतघ्नश्च प्रमादी सर्वे त्याज्या यश्च
स्तत्पंन वक्ति। अपि च। सत्यानृता च परुषा प्रियवादिनी च हिंस्रा दयालुरपि चार्थपरा वदा
न्या। नित्यव्यया प्रचुरमित्रसमागमा च वेश्यांगनेव नृपनीतिरनेकरूपा। एवं तेन स बाधितः
पिंगलकः संजीवकशोकं त्यक्त्वा दमनकसाचिव्येन राज्यमकरोत्॥ छ॥ समाप्तं चेदं मित्रभेदं ना
म प्रथमं तंत्रं॥ छ॥ ॥शुभं भवतु लेखकपाठकयोः॥ छ॥ संवत् १५८२ वर्षे मार्गे पो
ष शुदि १५ शुक्रे लिखितं श्रीपत्तनमध्ये॥ ॥शुभं भवतु। ॥कल्याणमस्तु॥ श्रीरस्तु॥ छ॥

7/1953

॥ ६९ ॥ श्रीगणेशाय नमः ॥ नमो विनायकाय ॥ अथेदमारभ्यते मित्रप्राप्तिकं नाम द्वितीयं तंत्रं । यस्यायमादिमः श्लो-
कः ॥ असाधना वित्तहीना बुद्धिमंतो बहुश्रुताः ॥ साधयंत्याशु कार्याणि काकाखुमृगकूर्म-
वत् ॥ तद्यथानुश्रूयते । अस्ति दाक्षिणात्ये जनपदे महिलारोप्यं नगरं नाम । तस्य नाति-
दूरतो महोच्छ्रायवान्न्यग्रोधपादपो नानाविहगोपभुक्तफलः कीटैरावृतकोटरः छाया-
श्वासितपथिकजनसमूहः । उक्तं च । छायासुप्तमृगः शकुंतनिवहैर्विघुष्टवि-
लुप्तच्छदः कीटैरावृतकोटरः कपिकुलैः स्कंधे कृतप्रश्रयः ॥ विस्रब्धं मधुपैर्निपी-
तकुसुमः श्लाघ्यः स एव द्रुमः ॥ सर्वांगैर्बहुजीवसंघसुखदो भूभारभूतोऽपरः ॥ तत्र
च लघुपतनको नाम वायसः प्रतिवसति स्म । स कदाचित्प्राणयात्रार्थं पुरमुद्दिश्य प्रचलि-
तो यावत्पश्यति तावज्जालहस्तोऽतिकृष्णतनुः स्फुटितचरण ऊर्द्ध्वकेशो यमकिंकराकारो नरः
सम्मुखो बभूव । अथ तं दृष्ट्वा व्यचिंतयत् । यदयं दुरात्मा अद्य ममाश्रयवटपादपसम्मुखो-
ऽभ्येति । किमद्य वटवासिनां विहंगमानां विनाशो भविष्यति न वा । एवं बहुविधं विचिंत्य तत्क्ष- ६९

णान्निवर्त्य तमेव वटपादपं गत्वा सर्वान्विहंगमान्प्रोवाच ॥ भोः अयं दुरात्मा लुब्धको जालतंडु-
लहस्तः समायाति । तत्सर्वथा तस्य न विश्वसनीयं । एष जालं प्रसार्य तंडुलान्प्रक्षेप्स्यति । ते भवद्भिः स-
र्वैरपि तंडुला हलाहलसदृशा द्रष्टव्याः । एवं वदतस्तस्य स लुब्धकः तत्र वटतलमागत्य जालं प्रसार्य सिंदु-
वारसदृशान्तंडुलान्प्रक्षिप्य नातिदूरं गत्वा निभृतं स्थितः । ये पक्षिणस्तत्र स्थितास्ते लघुपत-
नकवाक्यार्गलया निवारितास्तांस्तंडुलान्हलाहलांकुरानिव वीक्षमाणा निभृतास्तस्थुः । अ-
त्रांतरे चित्रग्रीवो नाम कपोतराजः सहस्रपरिवारः प्राणयात्रार्थं परिभ्रमंस्तांस्तंडुलान्दू-
रतोऽपि पश्यन् लघुपतनकेन निवार्यमाणोऽपि जिह्वालौल्याद्भक्षणार्थमपतत् । सपरिवा-
रो निबद्धश्च । अथवा साध्विदमुच्यते । अथ जिह्वालौल्यप्रसक्तानां जलमध्यनिवासिनां । अचिंति-
तो वधो ज्ञातानां मीनानामिव जायते ॥ अथवा न तस्य दोषः । उक्तं च । पौलस्त्यः कथमन्यदारहरणे
दोषं न विज्ञातवान् रामेणापि कथं न हेमहरिणस्यासंभवो लक्षितः । अक्षैश्चापि युधिष्ठिरेण
सहसा प्राप्तो ह्यनर्थः कथं प्रत्यासन्नविपत्तिमूढमनसां प्रायो मतिः क्षीयते ॥ तथा च कृतांतपाश-

9/1953

।रवा।

बद्धानां दिवापदत्तचेतसां ॥ बुद्धयः कूटगामिन्यो भवंति महतामपि ॥ अत्रांतरे लुब्धकस्तान्बद्धान्वि
ज्ञाय प्रहृष्टमनाः प्रोद्यतयष्टिस्तदभिमुखं प्रधावितः ॥ चित्रग्रीवोऽप्यात्मानं सपरिवारं बद्धं मत्वा लुब्धकमा
यांतं दृष्ट्वा तान् कपोतानूचे ॥ अहो न भेतव्यं ॥ व्यसनेष्वेव सर्वेषु यस्य बुद्धिर्न हीयते ॥ स तेषां पारम
भ्येति तत्प्रभावादसंशयं ॥ तत्सर्वे विहंगा उड्डीय पाशजालस्यादर्शनं गत्वा मुक्तिं प्राप्नुमः ॥ नो
चेद्भयविक्लवाः संतो वेलया समुत्पतनं करिष्यथ तदा मृत्युमवाप्स्यथ ॥ उक्तं च ॥ तंतवोऽ
प्यायता नित्यं तंतवो बहुलाः समाः ॥ बहून्बहुत्वादायासान्सहंतीत्युपमा सतां ॥
तथानुष्ठिते लुब्धको जालमादायाकाशं गच्छतां ॥ तेषां पश्चाद्भूमिस्थः पर्यधावत् ॥
ततऊर्द्ध्वाननः श्लोकमपठत् ॥ जालमादाय गच्छंति संहताः पक्षिणोऽप्यमी ॥ यावच्च विपतिष्यंति यावच्च पति
ष्यंति न संशयः ॥ लघुपतनकोऽपि प्राणयात्राक्रियां त्यक्त्वा किमत्र भविष्यतीति कुतूहलात्तत्पृष्ठ
लग्नोऽनुसरति ॥ अथ दृष्टेरगोचरतां गतान्विज्ञाय लुब्धको निराशः श्लोकमपठत् ॥ निवृत्तश्च ॥ न हि
भवति यन्न भाव्यं भवति च भाव्यं विनापि यत्नेन ॥ करतलगतमपि नश्यति यस्य हि भवितव्यता नास्ति ॥ ६८॥

या ॥ पराङ्मुखे विधौ चेत्स्यात्कथंचिद्द्रविणोदयः ॥ तत्सोऽन्यदपि संगृह्य याति शंखनिधिर्यथा ॥ तदस्तु
तावद्विहंगामिषलोभो यावत्कुटुंबवर्तनोपायभूतं जालमपि मे नष्टं ॥ चित्रग्रीवोऽपि लुब्धकमदर्श
नीभूतं ज्ञात्वा तानुवाच ॥ निवृत्तः स दुरात्मा लुब्धकः ॥ तत्सर्वैरपि स्वस्थैर्गम्यतां ॥ महिलारोप्यस्य प्रागु
त्तरदिग्भागे ॥ तत्र मम सुहृद्धिरण्यको नाम मूषकोऽस्माकं सर्वेषां पाशांश्छेत्स्यति ॥ उक्तं
च ॥ सर्वेषामेव मर्त्यानां व्यसने समुपस्थिते ॥ वाङ्मात्रेणापि साहाय्यं मित्रादन्यो न संदधे ॥ एवं ते कपोता
श्चित्रग्रीवेण संबोधिता महिलारोप्यनगरे हिरण्यबिलदुर्गं प्रापुः ॥ हिरण्यकोऽपि सहस्र
मुखबिलदुर्गं प्रविष्टोऽकुतोभयः सुखेनास्ते ॥ अथवा साध्विदमुच्यते ॥ दंष्ट्राविरहितः सर्पो म
दहीनो यथा गजः ॥ सर्वेषां जायते वश्यो दुर्गहीनस्तथा नृपः ॥ तथा च ॥ न गजानां सहस्रेण न च ल
क्षेण वाजिनां ॥ तत्कर्म सिध्यते राज्ञां दुर्गेणैकेन यद्रणे ॥ शतमेकोऽपि संधत्ते प्राकारस्थो धनुर्धरः ॥ त
स्माद्दुर्गं प्रशंसंति नीतिशास्त्रविदो जनाः ॥ अथ चित्रग्रीवो बिलमासाद्य तारस्वरेण प्रोवाच ॥ भो भो मि
त्र चित्रग्रीवोऽहं ॥ हिरण्यक सत्वरमागच्छ ॥ महती मे व्यसनावस्था वर्तते ॥ तच्छ्रुत्वा हिरण्यकोऽपि बिलदुर्गा

11/1953

ारवा॰ नर्गतः सन्प्रोवाच। भो। कस्त्ववान्। किमर्थमायातः। किंकारणं। कीदृक्तव्यसनावस्था तत्कथ्यतामिति।
ततश्चित्रग्रीवश्चाह। सो चित्रग्रीवो नाम कपोतराजोऽहं ते सुहृत्। तत्सत्वरमागच्छ। २ युक्तनरं प्रयो
द्गतमस्ति। तदाकर्ण्य पुलकिततनुः प्रहृष्टात्मा स्थिरमनाः त्वरमाणो निःक्रान्तः। [illegible] सुवते
स्मि हृदः प्रियसंप्रलापवनानंददायिनः॥ यू   हृदयस्थवर्ती नित्यं नागच्छत्यमहात्मनां। तथा च [illegible]
तिशयो यस्य समागमेति नित्यशः। चित्रेवि   त्तस्य सोऽस्ति धन्यः स्यात् किं विपद्गतो दिवः। अथ चित्र
ग्रीवं सपरिजनं बद्धमालोक्य हिरण्यः सवि   स्मयः किमिदमाह। किमेतत्। स चाह। सो जान
न्नपि किं पृच्छसि। उक्तं च। यतः। यस्माच्च येन च   यथा च यदा च यच्च यावच्च यत्र च शुभाशुभमात्मक
र्म। तस्माच्च तेन च तथा च तदा च तच्च तावच्च तत्र च   कृतान्तवशादुपैति। तन्मयाप्येतद्बन्धनं जिह्वालौल्या
त्। तत्त्वं पाशमोक्षं कुरु। मा विलंब। तदाकर्ण्य हिरण्यः प्राह। अध्यर्धाद्योजनशतादामिषं पश्यते खगः।
सोऽपि पार्श्वस्थितं दैवाद्बंधनं न च पश्यति। अथवा। शशिदिवाकरयोर्ग्रहपीडनं गजभुजंगविहंगमबंध
नं। मतिमतां च विलोक्य दरिद्रतां विधिरहो बलवानिति मे मतिः। तथा च। व्योमैकांतविहारिणोऽपि विह ६६

गाः संप्राप्नुवंत्यापदं बध्यंते निपुणैरगाधसलिलान्मीनाः समुद्रादपि। दुर्नीतं किमिहास्ति किं च सुकृ
तं कः स्थानलाभे गुणः कालः सर्वजनान्प्रसारितकरो गृह्णाति दूरादपि। एवमुक्त्वा चित्रग्रीवस्य पाशं
छेत्तुमुद्यतं स तमाह। सखे मा मैवं कुरु। प्रथमं मम भृत्यानां पाशच्छेदं कुरु। तदनु ममापि च। ततश्च
चाकर्णितो हितो हिरण्यः प्राह। नानयु   क्तमुक्तं भवता। यतः स्वामिनोऽनंतरं भृत्याः। स चाह।
तद्द मा मैवं वद। ममाश्रयाः सर्वेऽप्येते व   राकाः। अपरं स्वकुटुंबं परित्यज्य समागताः। तत्क
थामेतावन्मात्रमपि सन्मानं न करो   मि। उक्तं च। यः सन्मानं सदा धत्ते भृत्यानां क्षि
तिपाधिकं। वित्ताभावेऽपि तं दृष्ट्वा तत्य   जंति न कदाचन। तथा च। विश्वासः संपदां मूलं ते
न यूथपतिर्गजः। सिंहो मृगाधिपत्येऽपि न   मृगैरुपयुज्यते। अपरं मम कदाचित्पाशच्छेदं कुर्वत
स्तव दंतभंगो भवति। अथवा दुरात्मा लुब्धकः समभ्येति। तन्नूनं मम नरकपात एव। उक्तं च। सदाचार
षु भृत्येषु प्रसीदत्सु यः प्रभुः। सुखी स्यान्न नरकं याति परत्रेह च सीदति। ततश्च प्रहृष्टो हिरण्यः प्रा
ह। जानाम्यहं राजधर्मं परं मया तव परीक्षा कृता। तस्मादेषां पूर्वं पाशच्छेदं करिष्यामि। भवानप्यनेन प्र

13 / 1953

विधिनाबद्धकपोतपरिवारात्तविष्यति। उक्तं च। कारुण्यं संविभागं च यस्य भृत्येषु सर्वदा। संभवत्यसम
दीपाबद्धस्त्रैलोक्यस्यापि रक्षणे। एवमुक्त्वा सर्वेषां पाशांश्छित्त्वा हिरण्यश्चित्रग्रीवमाह। मित्र गम्यताम
धुनाबद्धकपोतपरिवारः स्वाश्रयाय प्रयाया। पिव्यसनप्राप्ते समागंतव्यमिति। तान्प्रस्थाप्य पुनरपि दुर्गं
प्रविष्टः। चित्रग्रीवोपि सपरिवारः स्वाश्रयमग मत्। अथवा साधूक्तमुच्यते। मित्रवान्साधयत्यर्थान्
दुःसाधानपि वियतः। तस्मान्मित्राणि कु र्वीत समान्यैव चात्मनः। लघुपतनकोपि सर्वं तत्
चित्रग्रीवबंधमोक्षणमवलोक्य विस्मित मनाश्चाचिंतयत्। अहो बुद्धिरस्य हिरण्यस्यश
क्तिश्च दुर्गस्य सामग्री तदीदृगेव विधिर्विह ङ्गानां बंधनामोक्षः। अहं च न कस्यापि विश्वसिमि
। चलप्रकृतिश्च। तथाप्येनं मित्रं करोमि। उक्तं च। अपि संपूर्णतायुक्तैः कर्तव्याः सुहृदो बुधैः। नदीशः
परिपूर्णोपि चंद्रोदयमपेक्षते। एवं संप्रधार्य पादपादवतीर्य बिलद्वारमाश्रित्य चित्रग्रीववत्तशाह्वतं
माहूतवान्। एह्येहि हिरण्यक एहि। तच्छब्दं श्रुत्वा हिरण्यो व्यचिंतयत्। किमन्योपि कश्चित् कपोतो बंधनशे
षस्तिष्ठति। येन मां व्याहरति। आह च। भोः को भवान्। स आह। अहं लघुपतनको नाम वायसः। विशेषादंत

लीनआहवायसो द्रुतं गम्यतां। अस्मात्स्थानात्। अहं तव पार्श्वे गुरुकार्येण समागतः। तत्किं न क्रियते त्व
या सह दर्शनं। हिरण्य आह। नास्ति त्वया सह संगमेन प्रयोजनमिति। स आह। यत् चित्रग्रीवस्य मया
तव सकाशात्पाशमोक्षणं दृष्टं। तेन मम महती प्रीतिः संजाता। तत्कदाचिन्ममापि बंधने जाते तव
पार्श्वान्मुक्तिर्भवति। तत्क्रियतां मया सह मैत्री। हिरण्य आह। सोचेनोक्तं। अहं तव भोज्यभूतः।
त का त्वया सह मम मैत्री। तद्गम्यतां। मि त्री विरोधभावात्। उक्तं च। ययोरेव समं वित्तं ययो
रेव समं कुलं। तयोर्मैत्री विवाहश्च न तु पुष्टविपुष्टयोः। तथा च। यो मित्रं कुरुते
मूढ आत्मनोऽसदृशं कुधीः। हीनं वा प्यधिकं वापि हास्यतां यात्यसौ जनः। तद्गम्यतामि
ति। वायस आह। भो हिरण्यक एषोऽहं त व दुर्गद्वारे उपविष्टः। यदि त्वं मैत्रीं न करोषि। ततोऽहं
प्राणयात्रां करिष्यामि। अन्यथा प्रायोपवेशनं मस्यामिति। हिरण्य आह। त्वया वैरिणा सह क
थं मैत्रीं करोमि। उक्तं च। वैरिणा न हि संदध्यात्सुश्लिष्टेनापि संधिना। सुतप्तमपि पानीयं शमय
त्येव पावकं। वायस आह। त्वया सह दर्शनमपि नास्ति कुतो वैरं। तत्किमनुचितं वदसि। हिरण्य

15/1953

वारवा० आह। सो हि द्विविधं वैरं भवति। सहजं। कृत्रिमं च। तत्सहजवैरी त्वमस्माकं। तदुक्तं च। कृत्रिमे नाशमभ्येति
वैरं क्षिप्रं कृत्रिमैर्गुणैः। प्राणदानं विना वैरं सहजं याति न क्षयं॥ वायस आह। सो हि द्विविधस्य वैरस्य
लक्षणं श्रोतुमिच्छामि। तत्कथ्यतां। हिरण्य आह। यो कारणेन निर्वृत्तं स कृत्रिमं। तत्तदर्होपकारक
णात् गच्छति। स्वाभाविकं वस्तुनः कथमपि न गच्छति। तद्यथा। नकुलसर्पाणां। शष्पभुग्नखायु
धानां। जलवह्निनां। देवदैत्यानां। सा रमेयमार्जाराणां। ईश्वरदरिद्राणां। सपत्नीनां। सिं
हगजानां। लुब्धकहरिणानां॥ श्रोत्रियभ्रष्टक्रियाणां। मूर्खपंडितानां। पति
व्रताकुलटानां। सज्जनदुर्जनानां। न क स्यचित्केनापि व्यापादितः। तथापि प्राणान् संतापयंति।
वायस आह। नन्वकारणमेतत्। श्रूयतां मे वचनं। कारणान्मित्रतां याति कारणाद्याति
शत्रुतां। तस्मान्मित्रत्वमेवात्र योज्यं वैरं न धीमता। तस्मात्कुरु मया सह समागमं मित्रधर्मार्थं
। हिरण्य आह। श्रूयतां नीतिसर्वस्वं। सकृद्दुष्टमपीष्टं यः पुनः संधातुमिच्छति। स मृत्युमुप
गृह्णाति गर्भमश्वतरी यथा। अथवा गुणवानहं। न मे कश्चिद्वैरयातनां करिष्यति। एतदपि न॥ ६८

वर्त्तां कथ्या। सिंहो व्याकरणस्य कर्तुरहरत्प्राणान्प्रियान्पाणिनेर्मीमांसाकृतमुन्ममाथ सहसा हस्ती
मुनिं जैमिनिं। छंदोज्ञाननिधिं जघान मकरो वेलातटे पिंगलं। अज्ञानावृतचेतसामतिरुषां कोऽर्थस्ति 17/1953
रश्चां गुणैः॥ वायस आह। अस्त्येतत्तथापि श्रूयतां। उपकाराच्च लोकानां निमित्तान्मृगपक्षिणां। भयाल्लो
भाल्लोभान्मूर्खाणां मैत्री स्याद्दर्शनात्सतां॥ तन्माधुर्यं। अपरं शपथ्या द्वितिर्निर्णयं करिष्यामि।
स आह। नास्ति शपथैः प्रत्ययः॥ तदुक्तं च। शपथैः संधितस्यापि न विश्वासं व्रजेद्रिपोः॥
श्रूयते शपथं कृत्वा वृत्रः शक्रेण सूदितः। न विश्वासं विना शत्रुर्देवानामपि सि
ध्यति। विश्वासात्त्रिदशेन्द्रेण दितेर्गर्भो विदारितः॥ बृहस्पतेरपि प्राज्ञस्तस्मान्नैवात्र
विश्वसेत्। य इच्छेदात्मनो वृद्धिमायुष्यं च सुखानि च॥ सुसूक्ष्मेणापि छिद्रेण प्रविशत्यंतरं रि
पुः। नाशयेच्च शनैः पश्चात् प्लवं सलिलपूरवत्॥ य इच्छेदात्मनो वृद्धिमायुष्यं च सुखानि च॥
न विश्वसेदविश्वस्ते विश्वस्तेऽपि न विश्वसेत्। विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृंतति॥ न विश्वस्तो
विश्वस्तो दुर्बलोऽपि बलोत्कटैः॥ विश्वस्ताश्चाशु वध्यंते बलवंतोऽपि दुर्बलैः॥ सुकृत्यं विष्णुगुप्त

।ख॰प सुमित्रापि निर्गविस्य च। बृहस्पतिरविश्वासो नीतिसंधिविग्रहस्थिता। जीर्णान्यतानि मात्रयः कपिला प्रा
णिनं त्रयः। बृहस्पतिरविश्वास्यः पांचालः स्त्रीषु मार्दवं। तथा च। महताप्यर्थसारेण यो विश्वसिति शत्रुषु संसम
तं गतः। भार्यासु सुविरक्तासु तदंतं तस्य जीवितं। ततः श्रुत्वा लघुपतनकोऽपि निरुत्तरश्चिंतयामास। अहो बुद्धि
प्रागल्भ्यमस्येति विशेषतः। अथ वा न एवास्य॥ परिमितं परकृपा नः। स आह। भो हिरण्य। सतां साप्तपदी
नं मित्रं मा कुरिति विचिंत्य जना॥ बलात् मित्रतां प्राप्तो मम। ततस्त्वं तथ्यं वाक्यं। दुर्गस्थेना
पि त्वया मया सह नित्यं मवालाप गुणदोषसुभाषितगोष्ठीकथ्यादि सर्वदा कर्त्तव्या।
एवं न विश्वसिषि। ततः श्रुत्वा हिरण्योऽपि व्यचिंतयत्। विदग्धवचनोऽयं दृश्यते लघुपतनकः। स
त्यवाक्यश्च। ततः युक्तमस्तेन मित्री। परं कदा चित्तु मम दुर्गं वरणं प्रातोऽपि न कार्यः। उक्तं च। चलिता भी
तः पुरा शत्रुर्मंदं विसर्पति। भूमौ पश्चात्सलया पश्चात्परहस्ताः गता। श्रुत्वा तद्वाक्यं वायसः आह। एवं
एवं भवतु। ततः प्रभृति तावपि सुभाषितगोष्ठीसुखमनुभवंतौ तिष्ठतः। परस्परं कृतोपकारौ का
लं नयतः। लघुपतनकोऽपि मांसशकलानि मेध्यानि बलिशेषाणि अन्यानि वात्सल्याहृतानि पक्कान्न हि॰प

विशेषाणि हिरण्यार्थमानयति। हिरण्योऽपि रात्रौ तंदुलानन्यांश्च भक्ष्यविशेषान् लघुप
तनकार्थं रात्रौ आहृत्य तत्कालायातस्यार्पयति। अथ वा साधिदमुच्यते। युक्तं तद्द्वयोरप्येतत्। ददा
ति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति। भुंक्ते भोजयते चैव षड्विधं प्रीतिलक्षणं॥ नोपकारं विना प्रीतिः क
थंचित्कस्यचिद्भवेत्। उपयाचितदानेन यतो देवा अभीष्टदाः॥ तावत्प्रीतिर्भवेल्लोके यावद्दानं प्रदीय
ते। वत्सः क्षीरक्षयं दृष्ट्वा परित्यजति मातरं। पश्य दानस्य माहात्म्यं सद्यः प्रत्ययकारकं। यत्प्रभावा
दपि द्वेषी मित्रतां याति तत्क्षणात्॥ पुत्रादपि प्रियतरं खलु तेन दानं मन्ये पशोरपि वि
वेकविवर्जितस्य। दत्ते खलेऽपि निखिलं खलु येन दुग्धं नित्यं ददाति महिषी खलु वा न पत्या॥
किं बहुना। प्रीतिं निरंतरां कृत्वा दुर्भेद्यां नखमांसवत्। मूषको वायसश्चैव गतौ कृत्रिममित्र
तां॥ एवं मूषकस्तदुपकाररंजितस्तथा सविश्वस्तो यथा तस्य पक्षमध्ये प्रविष्टस्तेन सह सर्वदा गोष्ठीं
करोति। अथान्यस्मिन्नहनि वायसोऽश्रुपूर्णनयनः समभ्येत्य सगद्गदं तमुवाच। भद्र हिरण्य विर
क्तिः संजाता मम सांप्रतं देशस्यास्योपरि। तदन्यत्र यास्यामि। हिरण्य आह। भद्र किं विरक्तेः कारणं सञ्जा

19/1953

ाखा०। आह। त्वइश्रूयतां। अत्रदेशे मह्या। अनावृष्ट्या दुर्भिक्षं संजातं। दुर्भिक्षत्वाज्जनो बुभुक्षापीडितः। कोपि बलि-
मात्रमपि न प्रयच्छति। अपरं गृहे २ बुभुक्षितजनैर्विहगानां बंधनाय पाशाः प्रगुणीकृताः संति। अहम-
प्यायुःशेषतया पाशेन बद्ध उद्धरितोस्मि। एतद्विदेशे कारणं। तेनाहं विदेशं चलितः। बाष्पमोक्षं
करोमि। हिरण्य आह। अथ भवान्क्व प्रस्थि- तः। स आह। अस्ति दक्षिणापथे वनगहनमध्ये महास-
रः। तत्र त्वत्तोधिकः परमसुहृत् कूर्मो मं- थरको नाम। स च मां मत्स्यमांसखंडानि दास्यति। तद्भक्ष-
णात्तेन सह सुभाषितगोष्ठीसुखमनु- भवन्सुखेन कालं नयिष्यामि। नाहमत्र विहगा-
नां पाशबंधनेन क्षयं द्रष्टुमिच्छामि। उक्तं च। कोतिभारः समर्थानां किं दूरं व्यवसायिनां। को विदे-
शः सविद्यानां। कः परः प्रियवादिनां। विद्वत्वं च नृपत्वं च नैव तुल्यं कदाचन। स्वदेशे पूज्यते राजा वि-
द्वान्सर्वत्र पूज्यते। उक्तं च। अनावृष्टिहते देशे सस्ये च प्रलयं गते। धन्यास्तात न पश्यंति देशभंगं कु-
लक्षयं। हिरण्य आह। यद्येवं तदहमपि त्वया सह गमिष्यामि। ममापि महद्दुःखं वर्त्तते। वायस आ-
ह। तत्र किं दुःखं। तत्कथय। हिरण्य आह। तो बहु वक्तव्यमस्ति। अत्र विषये। तत्रैव गत्वा सर्वं सवि- १०

तथापि प्रयत्नेन वहिष्ये

स्तरं कथयिष्यामि। वायस आह। अहं तावदाकाशगतिः। कथं भवतो मया सह गमनं। स आह। यदि
वं तद्वत्पोऽहं यद्भवंतं महांतं कालं नयामि। अहं संपातादिकानष्टौ उड्डीनगतिविशेषान्वेद्मि।
तत्समारूढ मम पृष्ठे। येन सुखेन तत्सरः प्रापयामि। हिरण्य आह। उड्डीनानां नामानि श्रोतुमि-
च्छामि। स आह। संपातं विप्रपातं च महा- पातं विपातनं। वक्रं तिर्यक् तथा चोर्ध्वमष्टमं लघुसंज्ञ-
कं। तत्श्रुत्वा हिरण्यस्तत्क्षणादेव त- दुपरि समारूढः। सोपि शनैः २ तमादाय संपाता-
ड्डीनप्रस्थितः क्रमेण तत्सरः प्राप्तः। ततो लघुपतनकं मूषकाधिष्ठितं विलोक्य दूर-
तः पि देशकालवित्सामान्यकाको- ऽयमिति ज्ञात्वा सत्वरं मंथरको जलं प्रविष्टः। लघु-
पतनकोपि तीरस्थतरुकोटरे हिरण्यं मु- क्त्वा शाखाग्रमारुह्य तारस्वरेण प्राकारयत्। सखे मंथर-
क आगच्छ २ तव मित्रं अहं लघुपतनको नाम वायसः। चिरात्सोत्कंठः समायातः। तदागत्या-
लिंगय मां। उक्तं च। किं चंदनैः सकर्पूरैस्तुहिनैः किं च शीतलैः। सर्वे ते मित्रगात्रस्य कलां
नार्हंति षोडशीं। तत्श्रुत्वा निपुणतरं ज्ञात्वा सत्वरं सलिलान्निःसृत्य पुलकिततनुरानंदाश्रु-

21/1953

वा ख्या० रितन्नयमो मंथरकः प्रोवाच। एह्येहि मित्रालिंगय मां॥ चिरकालान्मया सम्यक्त्वं न ज्ञातः॥ ततो हं सलि-
लांतः प्रविष्टः। उक्तं च। यस्य न ज्ञायते वीर्यं न कुलं न विचेष्टितं। न तेन सं... संगतिं कुर्यादित्युवाच बृह-
स्पतिः॥ एवमुक्ते लघुपतनको वृक्षादवतीर्य तमालिंगितवान्। साधु इदमुच्यते॥ अमृतस्य प्रवाहैः किं
-- क्षालनसंभवैः। चिरान्मित्रपरिष्वंगो। यो सौ मूल्यविवर्जितः। एवं द्वावपि तौ विहितालिंग-
नौ परस्परं पुलकितशरीरौ वृक्षादधः समुपविष्टौ। प्रोचतुरात्मचरित्रवृत्तांतं। हिरण्यको-
ऽपि मंथरकस्य प्रणामं कृत्वा वायसस्यांतिके समुपविष्टः। अथ तं समालोक्य मंथर-
को लघुपतनकमाह। भोः कोऽयं मूषकः। कस्माच्च त्वया भक्ष्यभूतोऽपि पृष्ठमारुह्यानीतः। त-
त्रात्र स्वल्पकारणेन भाव्यं। तच्छ्रुत्वा लघुपतनक आह। भोः हिरण्यको नाम मूषकोऽयं मम सुहृ-
त् द्वितीयमिव जीवितं। तत्किं बहुना। पर्जन्यस्य यथा धारा यथा वा दिवि तारकाः॥ सिकता रेणवो य-
द्वत्संख्यायाः परिवर्जिताः। गुणाः संख्यापरित्यक्तास्तद्वदस्य महात्मनः॥ परं निर्वेदमापन्नः संप्राप्तो-
ऽयं तवांतिकं। मंथरक आह। किमस्य वैराग्यकारणं। वायस आह॥ पृष्टो मया तत्र च परमनेनाभिहि- ९२

पि।

तं। यतो बहु वक्तव्यमस्ति तत्प्रविगतः कथयिष्यामि। ममापि न निवेदितं। तद्भद्र हिरण्यक इदानीं नि-
वेद्यतामुभयोरप्यावयोस्तदात्मनः वैराग्यकारणं। यतः। स्वामिनि गुणागुणज्ञे गुणवति भृ-
त्येऽनुवर्तिनि कलत्रे च। मित्रे चानुपचार्ये निवेद्य दुःखं सुखी भवति॥ तत्सांप्रतं मित्रद्वयस्या-
पि मेलापकः संजातः। तत्कथ्यतामात्म-नो हृदयदुःखकारणं। सोऽब्रवीत्॥ अस्ति दाक्षि-
णात्ये जनपदे महिलारोप्यं नाम नग-रं। तस्य नातिदूरे मठायतनं भगवतः श्रीमहादे-
वस्य। तत्र च ताम्रचूडो नाम परिव्रा-जकः प्रतिवसति स्म। स च नगरे भिक्षाटनं
कृत्वा प्राणयात्रां समाचरति। भिक्षाशे-षं च विलंबयित्वा पश्चात् रात्रौ स्वपिति। प्रत्यूष-
वे तदन्नं कर्मकराणां दत्वा सम्यक्कृतेन च देवतायतनसंमार्जनोपलेपमंडनादिकं सम-
ज्ञापयति। अन्यस्मिन्नहनि मम बांधवैर्निवेदितं। स्वामिन् मठायतने सिद्धमन्नं मूषकभयात्तत्रै-
व भिक्षापात्रे निहितं। षंडुकेऽवलंबितं तिष्ठति सदैव। तद्वयं तद्भक्षयितुं न शक्नुमः॥ स्वामिनः अन-
र्गम्यं किमपि नास्ति। तत्किं वृथाटनेनान्यत्र। अद्य तत्र यात्रा यथेच्छया तु क्रमादितव प्रसादात्।

23/1953

ारत्ना० दानामदा कम्पि हिंसकत्वयुग परिहृतः। तत्क्षणा देवतत्र गतः। तत्पस्यैव तस्मिन् तिरस्कापात्रे समारूढः
तत्र तिरस्काविशेषाणि सकलकानां रचाण पश्चात्तु यमवल लक्षयामि। सार्वभौमप्रतिज्ञो नाथ्यात्मयः श्रुयदं
गच्छामः। एवं नित्यमेव तदन्नं लक्षयामि। परिव्राजकः प्रियया शास्त्रा रक्षति। एवं यावद्ववनितं ति
ता स्तवति। तदाहं तत्रारूह्यात्मकृत्यं करो मि। अथ कदाचित् ममरक्षणार्थं मदानयनः ऊर्ध्व
उज्जरवंशसमानीतः। तन्मुखमाः पिमम नयाज्जिरस्कापात्रे ताडयति। अहमप्यलक्षितलक्ष्य
त्रिप्रहारस्तयादपसर्पामि। एवं तेन सह सकलां रात्रिं विग्रहपरस्य कालो व्रजति।
अथान्यस्मिन्नहनि तस्य मठे बृहस्फि कपरिव्राजको नाम तस्य सुहृत्तीर्थयात्राप्रसं
गेन पांथः प्राणघूर्णिकः समायातः। तं दृ ष्ट्वा प्रत्युत्थानविधिना संभाव्य प्रतिपत्तिपूर्वकमभ्या
गतक्रियया नियोजितः। ततश्च रात्रावेकत्र कुशसंस्तरे द्वावपि प्रसुप्तौ। धर्मकथां कथयतः
रास्त्रीः। अथ बृहस्फिक्कथाव्याक्षेपमनसा ताम्रचूडो मूषकत्रासार्थं जर्जरवंशेन पि
रस्कापात्रं ताडयन् तस्य शून्यं प्रतिवचनं प्रयच्छति। तन्मना न किंचिदुदाहरति। अथासौ अभ्यागतः ५४

परं कोपमुपागत उवाच। भो ताम्रचूड परिज्ञातस्त्वं सम्यङ् न मित्रम्। तेन मया सह साह्लादं
न जल्पसि। तद्रात्रावपि त्वदीयं मठं त्यक्त्वा अन्यत्र मठे व्रयाभि स्यामि। उक्तं च। एह्यागच्छ समाश्र
यासनमिदं कस्माच्चिराद्दृश्यसे का वार्ता ह्यतिदुर्बलोऽसि कुशलं प्रीतोऽस्मि ते दर्शनात्। एवं
ये समुपागतान् प्रणयतः प्रह्लादयन्त्या दरात् तेषां युक्तमशंकितेन मनसा हर्म्याणि गंतुं सदा।
गृहीयत्रागतं दृष्ट्वा दिशो वीक्षेत वाप्य धः। तत्र ये सदने यांति ते शृंगरहिता वृषाः। नाभ्यु
त्थानक्रिया यत्र नालापा मधुराक्ष राः। गुणदोषकथा नैव तत्र हर्म्ये न गम्यते। तत्
एकमठप्राप्त्यापि त्वं गर्वितः। त्यक्तः सु हृत्स्नेहः। नैतद्वेत्सि। यत् त्वया मठाश्रयव्याजेन
नरकोपार्जना कृता। उक्तं च। नरकाय म तिस्ते चेत्पौरोहित्यं समाचर। वर्षं यावत् किमन्येन
न मठचिंतां दिनत्रयं। तन्मूर्ख शोचितव्ये गर्वं गतः। तदहं त्वदीयं मठं परित्यज्य यास्यामि। अ
थ तन्मुखेन त्रस्तमना ताम्रचूडस्तमुवाच। भो भगवन् मा मैवं वद। न त्वत्समोऽन्यो मम
सुहृत्कश्चिदस्ति। परं तत् श्रूयतां गोष्ठीशैथिल्यकारणं। एष दुरात्मा मूषकः प्रोन्नते स्थाने धृत

25/1953

सपि तिष्ठ भिक्षापात्रस्थमन्नमुत्प्लुत्य खादति॥ पितृव्यो ह। शेषं वत्तनात्रे कूद्यति। तद्भयाद्देवगृहमार्जनक्रि-
यापि न भवति। तन्मूषकत्रासार्थं एतेन वंशेन भिक्षापात्रं जर्जरं ताडयामि। नान्यत्कारणं।
एतत्तु कुतूहलमस्य दुरात्मनः यन्मार्जारमर्कटादयोपि तिरस्कृताः। अस्योत्पतनेन। बृहत्स्फि-
गाह। अथ ज्ञायते तस्य बिलः कस्मिंस्थि त्वादाशा। ताम्रचूड भगवन्न वेद्मि सम्यक्। सन्न्याह। नूनं
निधानस्योपरि तस्य बिलं। निधानोष्म णा प्रकूर्दति। उक्तं च। ऊष्मापि वित्तजो वृद्धिं त-
जो ह्यछि यति देहिनां॥ किंपुनस्तस्य संभोगस्त्यागकर्मसमन्वितः। तथा च। नाकस्मा-
त्शांडिलीमाता विक्रीणाति तिलैस्तिलान्। लुंचितानितरैर्येन कार्यमत्र भविष्यति। ता-
म्रचूड आह। कथमेतत्। सन्न्यासी आह। यदहं कस्मिंश्चित्स्थाने प्रावृट्कालमुद्दिश्य ग्रहणार्थं निमं-
कं विप्रब्राह्मणं वासं प्रार्थितवान्। ततस्तु तद्वचनात्तेनापि शुश्रूषितः। सुखेन देवार्चनपरस्तिष्ठामि।
अथान्यस्मिन्नहनि प्रत्यूषे प्रबुद्धोहं ब्राह्मणो कस्य ब्राह्मणी संवादे दत्तावधानः शृणोमि। त-
त्र ब्राह्मण आह। ब्राह्मणि प्रभाते दक्षिणायनसंक्रांतिरनंतदानफलदा भविष्यति। तदहं प्रतिग्र- ६३

हार्थं ग्रामांतरं यास्यामि। त्वया ब्राह्मणैकस्य भगवतः सूर्यस्योद्देशेन किंचिद्भोजनं दातव्यं। अ-
थ तच्छ्रुत्वा ब्राह्मणी परुषतरवचनैर्भर्त्सयमाना आह। कुतस्ते दारिद्र्योपहतस्य भोजनप्राप्तिः।
तत्किं न लज्जसे एवं ब्रुवाणः। किंच मया न ते हस्तलग्नया क्वचिदपि लब्धं सुखं। न मिष्टान्नस्या-
स्वादनं न च हस्तपादकंठादिभूषणं। तत् श्रुत्वा भयत्रस्तोपि विप्रो मंदं मंदमाह। ब्राह्मणि नैतद्
युज्यते वक्तुं। उक्तं च। ग्रासादर्द्धमपि ग्रासमर्थिभ्यः किं न दीयते। इच्छानुरूपो विभवः
कदा कस्य भविष्यति। ईश्वरा भूरि दानेन यल्लभंते फलं किल। दरिद्रस्तच्च का-
किण्या प्राप्नुयादिति नः श्रुतिः। दाता लघुरपि सेव्यो भवति न कृपणो महानपि स-
मृद्ध्या। कूपः स्वादुजलः प्रीत्यै लोकस्य न समुद्रः। तथा च। अकृतत्यागमहिम्नां मिथ्या
यदेष उलूको राजास्माकं भविष्यति। तदानीयतां नृपाभिषेकसंबंधिनः संभारा इति। अथ साधिते
विविधतीर्थोदके प्रगुणीकृते अष्टोत्तरशतमूलिकासंघाते प्रदत्ते सिंहासने वर्तिते सप्तद्वीपवती ९६

धरित्रीमंडलप्रसारिते व्याघ्रचर्मणि आपूरितेषु हेममयकुंभेषु दीपवादित्रेषु सज्जीकृतेषु
दर्पणादिषु मांगल्यवस्तुषु पठत्सु बंदिमुख्येषु वेदोच्चारणपरेषु समुदितस्वरेषु ब्राह्मणेषु
गीतपरासु युवतीजनेषु आनीतायामग्रमहिष्यां कृकालिकायां उलूकोऽभिषेकार्थं यावत्सिंहासने
उपविशति तावत्कुतोऽपि वायसः समायातः। सोऽचिंतयत्। अहो किमेष पक्षिमेलापको
महोत्सवश्च। अथ ते पक्षिणस्तं दृष्ट्वा मिथः प्रोचुः। अहो पक्षिणां मध्ये वायसश्चतुरः
श्रूयते। उक्तं च॥ नराणां नापितो धूर्तः पक्षिणां चैव वायसः। दंष्ट्रिणां च शृगाल-
स्तु श्वेतभिक्षुस्तपस्विनां॥ तदस्यापि वचनं ग्राह्यं॥ उक्तं च। बहुधा बहुभिः सार्द्धं चिंतिताः
सुनिरूपिताः। कथंचिन्न विलीयंते विद्वद्भिश्चिंतिता नयाः। अथ वायसः समासाद्य तानाह। अ-
हो किं महाजनसमागमोऽयं परममहोत्सवश्च। ते प्रोचुः। नास्ति कश्चिद्विहंगानां राजा। तदस्यो-
लूकस्य विहंगराजाभिषेको निरूपितोऽस्ति समस्तपक्षिभिः। तत्त्वमपि मतं देहि। प्रस्तावे स-
मागतोऽसि। अथासौ काकः विहस्याह। अहो न युक्तमेतद्यन्मयूरहंसकोकिलचक्रवाक-

73/1953

वा.ख.० शुकसारिकसारसादिषु पक्षिषु प्रधानेषु विद्यमानेषु दिवांधस्यास्य करालवक्रस्याभिषेकः
क्रियते मेतन्न मम मतो यतः। वक्रनाशश्च क्रूराक्षो रौद्रोऽप्रियदर्शनः। अक्रुद्धोऽयं दिवांधस्य
क्रुद्धः कीदृग्भविष्यति। तथा च। स्वभावरौद्रमत्युग्रं क्रूरमप्रियदर्शनं। उलूकं नृपतिं कृत्वा का
नः सिद्धिर्भविष्यति। अपरं वैनतेये स्वामिनि स्थिते किमेषां दिवांधः स्वामी क्रियते। तद्यद्य
पि गुणवान्न भवति तदाप्येकस्मिन्स्वामिनि स्थिते नान्यो नृपः प्रशस्यते। एक एव हितो
र्थाय तेजस्वी पार्थिवो भुवः। युगान्त इव रासंता बहवोऽत्र विपत्तये। तत्र स्वप्ना
म्नापि यूयं परेषामगम्या भविष्यथः। उक्तं च। गुरूणां नाममात्रेऽपि गृहीते स्वामिसंतवा
दुष्टानां पुरुषैस्तः क्षेमं तत्क्षणादेव या जायते। तथा च। व्यपदेशेन महतां सिद्धिः संजायते प
राः। शशिनो व्यपदेशेन वसंति शशकाः सुखं। ते ऊचुः। कथमेतत्। सोऽब्रवीत्। अस्ति कस्मिंश्चि
द्वने चतुर्दंतो नाम महागजो यूथाधिपः प्रतिवसति स्म। तत्र कदाचिन्महत्यनावृष्टिः संजाता। प्र
भूतवर्षाणि यावत्। तया तडागह्रदपल्वलसरांसि शोषमुपागतानि। अथ तैः समस्तगजैः स गज ८७

राजः प्रोक्तः। देव पिपासाकुला गजकलभा मृतप्रायाः। अपरे मृताश्च। तदन्विष्यतां कश्चिज्जला
शयः। यत्र जलपानेन स्वस्थतां व्रजंति। ततश्चिरं ध्यात्वा तेनाभिहितं। अस्ति महान्ह्रदो विवि
क्तप्रदेशे स्थले मध्यगतः पातालगंगाजलेन सदैव पूर्णः। ततस्ते तत्र याता जलमवगाह्या स्ना
नावसायांतेः क्रांताः। तस्य च ह्रदस्य समंतात् शशकबिलान्यसंख्यानि सुकोमलभूमौ ति 75/1953
ष्ठंति। ते च पिबसमस्तैरपि तैर्गजैरितस्ततो भ्रमद्भिः परिचूर्णिताः। बहवः शशका भग्न
पादशिरोग्रीवा विहीनाः। केचिन्मृताः। केचिज्जीवशेषा जाताः। अथ गते त
स्मिन्गजयूथे शशकाः सास्त्रुणा गजपादक्षुण्णसमावासाः। केचिद्भग्नपादा अ
न्ये जर्जरितकलेवरा रुधिरप्लुताः अन्ये हतशावकाः बाष्पपिहितलोचनाः समेत्या मि
थो मंत्रं चक्रुः। अहो विनष्टा वयं नित्यमेव तद्गजयूथमागमिष्यति। यतो नान्यत्र जलम
स्ति। तत्सर्वेषां नाशो भविष्यति। उक्तं च। स्पृशन्नपि गजो हंति जिघ्रन्नपि भुजंगमः। हसन्न
पि नृपो हंति मानयन्नपि दुर्जनः। तच्चिंत्यतां कश्चिदुपायः। तत्रैकः प्रोवाच। गम्यतां

रव०॥ दुरात्मा योगेन । किमन्यत । उक्तं च । मनुना व्यासेन च । त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् । कु-
लं जनपदस्यार्थे पृथिवीं त्यजेत् । मंत्र्यूचे । किं मया ममस्य प्रदांभित्वा पशुहट्टिकरीमपि । परित्यज्य नृपो
ऽपि मित्रमात्मार्थमविचारयत् । आपदार्थं धनं रक्षेद् दारान् रक्षेद् धनैरपि । आत्मानं सततं रक्षेद् दारै-
रपि धनैरपि ॥ तत्रान्यैः प्रोक्तं ॥ तापिच्छ पितामहं स्थानं नगरं कोतेमहं सात्पुक्तं । तत्कियन्तां तथा
कृते का विट्टिलीषिका । यदि कथमपि दिवा ग्रसमायाति । उक्तं च । निर्विषेणापि सर्पेण कर्तव्या महती फणा । विषं भवतु मा वा भूत् फटाटोपो भयंकरः ॥ दि-
पत्र अथान्यैः प्रोक्तं । यद्येवं तत्रैषां महद्दिलीषिकास्थानमस्ति । यन्न नाम मिलंति
सा च वस्तु रतस्तताय अत्राबिलीषिका । यतो विजयदत्तो नाम राजा सर्वत्र स्वामी । शशक
श्चंद्रमंडले निवसति । तत्प्रेष्यतां कश्चित् शशको यूथाधिपसकाशं यच्चंद्रः अत्र ह्रदे आग-
च्छंतं निषेधयति । यतोऽस्मत्परिग्रहः शशकः समंतात् वसति । एवमते हि तत्र ह्रदेऽयं वचनात् कदा-
पि निवर्तते । अथान्यैः प्रोक्तं । यद्येवं तदस्ति लंबकर्णो नाम शशकः स च वचनरचनाचतु-
रो दूतकर्मज्ञः । स तत्र प्रेष्यतामिति । उक्तं च । साकारो निस्पृहो वाग्मी नानाशास्त्रविचक्षणः । ५८

परचित्तावगंता च राज्ञो दूतः स उच्यते । अन्यच्च । यो मूर्खं लोलुपं चैव राजद्वारिकमाचरेत् । मिथ्यावादं
विशेषेण तस्य कार्यं न सिध्यति । तदन्विष्यतां यद्यस्माकं व्यसनात् आत्मनां च निर्मुक्तिः । अथान्यैः प्रो-
क्तं । अहो युक्तमेतत् । नान्यः कश्चिदुपायोऽस्माकं जीवितव्यस्य । तथैव क्रियतां । अथ लंबकर्णो
नाम शशको निश्चित्य निरूप्यतामिति । स च लंबकर्णः मानपुरःसरं सोऽपि शशकैः संबोध्य
गजयूथाधिपसमीपं निरूपितो गतश्च । तथानुष्ठिते लंबकर्णोऽपि गजमार्गमासाद्य
अगम्यं स्थलमारुह्य तं गजमुवाच । भो भो दुष्टगज किमेवं लीलया निःशंकत-
या चंद्रह्रदे आगच्छसि । तन्नागंतव्यं । निवर्त्यतामिति । तदाकर्ण्य विस्मितमना गज आ-
ह । को भवान् । स आह । अहं विजयदत्तो नाम शशकश्चंद्रमंडले वसामि । सोऽद्य तं भगवता चंद्र-
मसा तव पार्श्वे प्रहितः । तस्य वचनस्य श्रेष्ठत्वात् तत्रत्यो वासः आह । भोः शशक तत्कथय भग-
वतश्चंद्रमसः संदेशः । येन सत्वरं क्रियते । स आह । न जानासि । अतीतदिवसे यूथेन सह आगच्छता प्र-
भूता शशका निपातिताः । तत्किं न वेत्सि त्वं यन्मम परिग्रहः सोऽयं । तद्यदि जीवितेन ते प्र-

77/1902

पाखा० याजनं। तदा केनापि शशकेनापि अवष्टम्भं दत्त्वा गंतव्यमिति संदेशः। गज आह। अथ क्व वर्तते स भग
वान् स्वामी चंद्रः। स आह। अत्र ह्रदे सांप्रतं शशकानां रक्षणार्थं स्थितः। तान् हतशेषान् समाश्वासनाय
समायातोऽत्र तिष्ठति। अहं पुनः सर्वं तिकं प्रेषितः। गज आह। यद्येवं तद्दर्शय मे तं स्वामिनं। येन प्रण
म्यान्यत्र गच्छामः। शशक आह। भो आग च्छ मया सह एकाकी येन दर्शयामि। तथानुष्ठिते श
शको निशासमये तं गजेंद्रं ह्रदतीरं नी त्वा जलमध्यस्थितं चंद्रबिंबमदर्शयत्। आह च। अ
एष नः स्वामी जलमध्ये समाधिस्थोऽस्ति इति। तन्निभृतं प्रणम्य सत्वरं व्रजेति। नो चे
त् समाधिभंगात् भूयोऽपि प्रकुपितः का पं करिष्यति। अथ गजोऽपि त्रस्तमनाः तं प्रणम्य पु
नर्गमनाय प्रस्थितः। शशकाश्च तद्दिना दारभ्य सपरिवाराः सुखेन स्वेषु स्थानेषु तिष्ठंति स्म
अतोऽहं ब्रवीमि। व्यपदेशेन महतां सिद्धिरिति। तथा च क्षुद्रमर्थपतिं प्राप्य न्यायान्वेषणतत्पराः। उ
भावपि क्षयं प्राप्तौ पुरा शशकपिंजलौ। किं च। अलसं कापुरुषं व्यसनिनं अकृतज्ञं पृष्ठप्रलप
नशीलं स्वाम्यं येनाधिपत्याजयेत्। ते प्रोचुः। कथमेतत्। वायस आह। अस्ति कस्मिंश्चिद्वृक्षेऽ ६६

हं वसामि। तत्राधस्तात्कोटरे कपिंजलो नाम चटकः प्रतिवसति स्म। अथ स दिवसास्तमनवेलायां
आगतयोर्द्वयो रमणीयसुभाषितगोष्ठ्या देवर्षिब्रह्मर्षिराजर्षिपुराणचरितकीर्तनेन पर्यटनदृष्टा
नेककौतूहलप्रकथनेन परमसुखमनुभवतोः कालो व्रजति। अथ कदाचित् कपिंजलः प्रा
णयात्रार्थमन्यैश्चटकैः सहान्यं पक्व शालिप्रायं देशं गतः। ततो यावन्निशासमयेऽपि ना
यातः। तावदहं सोद्वेगमनास्तद्वि योगदुःखितश्चिंतितवान्। अहो किमद्य कपि
जलो नायातः। किं केनापि पाशेन बद्धः। उताहो स्वित्केनापि व्यापादितः। सर्वथा
यदि कुशली स्यात्तन्मां विना न ति ष्ठति। एवं मे चिंतयतो बहून्यहानि व्यतिक्रांता
नि। ततश्च तत्र कोटरे कदाचित् शीघ्रगो नाम शशकोऽस्तमनवेलायामागत्य प्रविष्टः। म
यापि कपिंजलनिराशत्वेन न निवारितः। अथान्यस्मिन्नहनि कपिंजलः शालिभक्षणादतीव
पीवरतनुः स्वमाश्रयं स्मृत्वा भूयोऽपि तत्रैव समायातः। अथवा साध्विदमुच्यते। न तादृक् जा
यते सौख्यमपि स्वर्गेऽपि देहिनां। दारिद्र्येऽपि हि यादृक् स्यात्स्वदेशे स्वपुरे गृहे। अथासौ कोटरा

79/1953

वा॰वा॰प नगतं शशकं दृष्ट्वा सक्रोपमाह। भो मदीयमेतत्गृहं। तत्तूर्णं निःक्रम्यतां। शशक आह। तत
वेदं गृहं। किं त्वमात्मेव। तत्किं मिथ्या परुषाणि जल्पसि। उक्तं च। वापीकूपतडागानां देवालयकुजन्मा
नां। उत्सर्गात्परतः स्वाम्यमपि कर्त्तुं न शक्यते॥ तथा च। प्रत्यक्षं यस्य यद्भुक्तं गृहाद्यं दश वत्सरान्। तत्र
भुक्तिः प्रमाणं स्यान्न साक्षी नाक्षराणि वा॥ मनुष्याणामयं न्यायो मुनिभिः परिकीर्त्तितः। तिरश्चां च वि
हंगानां यावच्छि×ष्ठु समाश्रयः। तन्मम तद्गृहं धर्मतो न तवेति। कपिञ्जल आह। यदि
स्मृतिं प्रमाणीकरोषि। तदागच्छ मया सह। येन स्मृतिपाठकं पृष्ट्वा स यस्य ददाति स गृ
ह्णातु। तथानुष्ठितमथापि चिन्तितं। किमत्र न विष्यति। मया दृष्टव्योऽयं न्यायः। ततः कौ
तुकादहमपि तावनुप्रस्थितः। अत्रान्तरे तीक्ष्णदंष्ट्रो नाम आरण्यमार्जारः स तयोर्विवादं श्रुत्वा
मार्गासन्ननदीतटमासाद्य कृतकुशोपग्रहो निमीलितनयन ऊर्द्ध्वपादस्पृष्टभूमिः सू
र्याभिमुख इमां धर्मदेशनामकरोत्। अहो असारोऽयं संसारः। क्षणभंगुराः प्राणाः। स्वप्नसदृशः प्रि
यसमागमाः। इन्द्रजालवत्कुटुम्बपरिग्रहोऽयं। तन्न धर्मं मुक्त्वा नान्या गतिरस्ति। उक्तं च। यस्य धर्मविही १००

हीनानि दिनान्यायान्ति यान्ति च। स लोहकारभस्त्रेव श्वसन्नपि न जीवति॥ नाच्छादयति कौपीनं न दंशमश
काप‍हं। शुनः पुच्छमिवानर्थं पाण्डित्यं धर्मवर्जितं॥ अन्यच्च। पुलाका इव धान्येषु पूत्तिका इव पक्षिषु।
मशका इव मर्त्येषु येषां धर्मो न कारणं॥ श्रेयः पुष्पफलं वृक्षाद्दध्नः श्रेयो घृतं स्मृतं। श्रेयस्तैलं च पिण्या
कात् श्रेयो धर्मस्तु मानुषात्॥ सृष्टा मूत्रपुरीषार्थमाहाराय च केवलं। धर्महीनाः परार्थाय पुरुषाः पश
वो यथा॥ स्थैर्यं सर्वेषु कृत्येषु शंसन्ति नयपण्डिताः। बहुन्तराययुक्तस्य धर्मस्य त्वरिता गतिः॥ सं
क्षेपात्कथ्यते धर्मो जनाः किं विस्तरेण वः। परोपकारः पुण्याय पापाय परपीडनं॥ श्रू
यतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यतां। आत्मनः प्रतिकूलानि परेषां न समाचरेत्॥ अथ तस्य तां
धर्मदेशनां श्रुत्वा शशक आह। भोः कपिञ्जल एष नदीतीरे तपस्वी धर्मवादी तिष्ठति। तदेनं पृच्छाव।
कपिञ्जल आह। ननु स्वभावतोऽयमस्माकं शत्रुः। तद्दूरे स्थित्वा पृच्छावः। कदाचिदस्य व्रतवैकल्य
सम्पद्यते। ततो दूरस्थितौ तावूचतुः। भोस्तपस्विन्धर्मदेशक आवयोर्विवादो वर्त्तते। तद्धर्मशास्त्रेण
ह्रा रणास्माकं निर्णयं दत्त्वा यो हीनवादी स ते भक्ष्य इति। स आह। भद्रौ मामैवं वदतं। निवृत्तोऽहं

81/1953

आख्या०॥ नरकमार्गाति हिंसाकर्मणः। अहिंसा एव धर्ममार्गः॥ उक्तं च। अहिंसा एव धर्ममार्गः॥ अतः पूर्वको धर्मो य
स्मात् अजितस्य हतः। सुकामकुणदंशादीन् तस्मात्तान् परिहरेयत। हिंसकान्येव कृतानि ये हिंस
विमनिमो विद्यते सति स निर्घृणाः। मयापि नरकं घोरं किं उत्तमं स्थानानि च। एतादृशानि कालिका अपि
नु कर्मणि प्रवृत्तं तितमूर्षाः। परमार्थश्च   तत् न जानन्ति तत्र किलितं उक्तं। यद् जीर्यते वा। अज
त्रीदयघावक्ष सर्वार्थिका कथ्यते। नतु   नः पुण्यविशेषाः। उक्तं च। बहूनां तु च्छिवा पश्चात्तु हृत्वा।
हत्वा रुधिरकर्दमा। यद्येवं गम्यते तत्र   गतिर्नरकं केन गम्यते। तत्राहं नरकं रक्षिष्यामि। ज
य पुराज यतिर्ममीयं करिष्यामि। परंतु   हं तत्र न यथावत् स्पृणामि। एवं ज्ञात्वा मम समीप
वर्तिनो ह्यन्या विवादं वदतां यत मतिज्ञा   त परमार्थविवादं वदतः परस्त्रं न विरुध्यते। उक्तं च। मा
ता ह्यायदि वाल्मी तत्क्रिया ह्याय दिवा न यात्रीयाः स्पात्। अन्यथा क्षीते मयापि नरकं नरः॥ तथा चा
क मनवाते तदंतिदशाहं मिगवाहते। ग्रासं कन्यार्चितं तं मनस्यं पुरुषा हते। उपविष्टः सत्ताम ध्ये
न वक्ति स्फुटं वचः॥ तस्मात् ह्यरण संत्यज्यान्यायार्थं वाक्यं च कृतं। तस्मात् हि विहर्तव्या कर्माणि न निवेश्य १०१

तो। किं बहुना। तेन कुटुंबेन धर्मं विश्वासितो बुलो। यथा बुद्धिविदां लोकानां संज्ञानां चक्रवर्तिनो।
नतस्थातं नापि समकालं मे कः पादे। तेनाक्ता तोऽस्यादेशा रूकैवेन। तेनागतः प्राणी तो तं हिता
विनि। अतोऽहं ब्रवीमि। कुटुंब मर्थं पतिं प्राप्य इति। तद्दुर्वतोः परं दिवां धर्मार्थ प्रतिज्ञा साध्यर
त्रंधः ज्ञात्वा कपिंजलमार्गे णयास्य   थः। एवं ज्ञात्वा यद् वितंतं हि धर्या। अथ तस्य तद्वचनं
श्रुत्वा साधुने नाति हितं मुक्तोः तु   व्याः पिपासिं यार्थं समेत्य मंत्रयिष्यामः। इति श्र
वणाः सर्वे यथा तिमतं जग्मुः   ।केवलमव शिष्टो तत्र सतोए विष्टो स्तिष्ठ।
कार्यं दिवांधः रुक्कला कयासदा   स्ते। अथातः नाति हितं। कः कोऽत्रत्र। किं मयापि
न क्रियते म इतिषकः। अथ कृकालि   कया ति हितं। कुतोऽयं विघ्नसिका केनागता स्त्रवि
हगाय पेश्विता सुदिह्। केवल मेक एवायं वायसः। केनापि हेतुना तिष्ठति। तद्विभिद्या
यितव्यं संस्थं ज्ञापयामि। ततः श्रुत्वा सप्तविषादं वायसमाह। तात दृष्टं तन्न किं मया त
स्पकृतं। यद्राज्यानिर्षिको मविघ्नितः। तदवद्य प्रभृति माद्यथनामा वयो विरं। उक्तं च। रादता

वा॰खा॰ सायंके विडिंवनं परस्पुनादतं।।वावा ङकरू कंबीतस्कंनश्रोदतिवाग्रकृतं।।इत्येवमभिधाय रूरकलिक
लिकया सहस्राश्रयंगतः।।अथ तयया कुलोवायाम्ना व्यवितर्थतं।।अहह्ःकारणविरमासादयितामा
या किंव्याहृतं।तत्कव।।श्ररदश।कालशमनायतिकृमंयदप्रियंलाघवकारिवात्मनः।।योऽन्नाब्रवीकार
णावर्तिनंवचोननइवस्माद्विषमेवतइविता। वलापवनेऽपिदिग्बुद्धिमापरः परंमयेवतंव्रमेवाविरतंगरि
षद्कममात्रीतिविवितस्यतद्कर्यितंग्रका। शणाक्कोदिविवरूणाविषं।।एवमुक्त्वाकाकोऽपिश्रुतव
नंप्रतिश्रायायातत्इत्राएवमस्माति।। सहविरेकोशकानामनयागतं।।मघवसंश्राह।।
तातंदेवंगतेऽस्मातिः किंक्रियतां।सत्रा दा।।वत्सएवंगतेऽपिषाकुण्णपादपरः छलोऽतिप्रायोऽ
त्रितंमंगीकृत्यसुमेवादतद्विजयायया। स्यामिरिपुर्नुवंवयित्वावधिष्यामितत्कंवाबङकुहिस
मोपेताःसुविज्ञानावलोकृतः।।शकावेववयितुंधूर्तासाद्यणंन्त्वागलादिवाममघवसीश्राहा।कथमेतत्
।।सोऽब्रवीत्।।अस्त्रिकस्मिंश्चिद्दक्षिणात्ये मित्रशर्मनामब्राह्मणः।।कृताग्निहोत्रपरिग्रहः।।प्रतिवसतिस्म
सकृदाविम्माघमासेसौम्यानिलप्रवातिमेघाच्छादितगगनेमंदंमंदंवर्षतिपर्जन्येपशुप्रार्थनार्थंकंचि १०२

ग्राममंतरंगत्वाकृष्चिद्यजमानोयाचितः।।तोयज्ञमानश्चागमिश्रमावास्यायांयक्ष्यामियज्ञं।।ततयत्तनोयं
पशुमेकंसमर्पय।।अथानेनातीवपीवरतनुःपशुःप्रदत्तः।।सोऽपिसमर्थमिमंपशुंइतस्ततंश्चगच्छंतंविज्ञाय
स्कंधेकृत्वासत्वरंपुरान्तिमुखंप्रतस्थे।।अथतस्यगच्छतोमार्गेत्रयोधूर्ताःकुत्क्षामकंठाःसत्मुखाव्यइव
तिस्मादृशंपीवरतनुंपशुंस्कंधेऽकृतमा।। लोक्य मिथःऽतिदिता।।तो श्रस्यपशोर्हरणाद्यतनीयो
दिमपाल्लोव्यर्थतांनीयेत।।तादनेवंवयि चास्यसकाशाकृत्यते।।अथ तेषामेकतमोवेषपरि
वर्त्तनंविधायसंमुखोऽभ्युच्चाश्रपर मार्गेणतमाहिताग्निमूचे।।भोभोबालाग्निहोत्रिकि
मेवंजनविरुद्धंहास्यकार्यमनुष्ठीय तेयदेषसारमेयोऽपवित्रःस्कंधेनाधिरूढोनीयते।।त
क्रंच।।श्चानकुकुटचांडालाःसमस्पर्शाःप्र कीर्त्तिताः।।रासभोष्ट्रोविशेषेणतस्मात्तान्नैवसंस्पृशे
त्।।ततस्तेनकोपाविष्टेनाभिहितं।।अहो।किमंधोभवान्।।यत्पशुंसारमेयंव्यवप्रतिपादयसि।।सोऽब्रवी
त्।।ब्रह्मन्कोपःकार्यस्ययथेच्छयागम्यतां।।अथयावत्किंचिद्वनांतरंगच्छतितावत्द्वितीयोधूर्त्तःसंमु
खमभ्युपेत्यतमुवाच।।भोब्राह्मणकष्टंयदपिवल्लभः।।तोऽयंमृतवत्सस्तथापिस्कंधमारोपयितुं

85
195

ग्रारवा० मशकः॥उक्तं च॥तिर्यंचं मानुषं वापि यो मृतं संस्पृशेत् कुधीः॥पंचगव्येन शुद्धिः स्यात् तस्य चांद्रायणेन वा॥
अथासौ मंकोपमादाय ता॥ किं मां प्राप्तवान् ॥ यत्त्वं पुत्र एवं वदसि॥ सोब्रवीत्॥ भगवन्मा कोपं कुरु॥ अज्ञा
नात्मया तत्ति हि तं॥ तच्च मा ज्ञानाद् वितनसमाचरति॥ अथ यावत् स लोकं वनांतरं गच्छति तावद् दृष्टो यो धूर्त
संमुखमागत्य तमुवाच॥ तात युक्तमनेनाय दुरात्मना कथं भृत्यं न यसि॥ ततस्तेनाप्युक्तं ताम शूद्र॥ उक्तं च॥
यः स्वशरीरं त्यजेत् मर्त्यो ज्ञानात् दुःख्यानात् तथा॥ वा लाभलवलोभात् तस्य द्विष्टतस्य पापवशात् तया तत्त्य
जितं॥ यावच्छो पि न पश्यति॥ अथासौ तं पशुं रासभं मन्यमानो तयातत्त्वामो ग्रहिष्यत्
गृहमुद्दिश्य पलायितुमारब्धः॥ ततस्तैः पि अयो मिलित्वा पशुमादाय यथेष्टया भक्षितुमारब्धा
॥ अतोहं ब्रवीमि॥ बहुबुद्धिसमोपेतान् इति॥ अथवा साधु इदमुच्यते॥ अतिनवागतकविनयैः प्राघु
र्णिकैर्विलासिनीरुदितैः॥ धूर्तजनवचननिकारैरिह कश्चिद वंचितो नाम्ति॥ तदत्र मन्त्रिकिं विड कच्यमे
वा॥ तद् वधार्य यथोक्तमनुष्ठीयतां॥ समादानर्दिनस समादिशद् एवोदेशो नान्यथा कार्यः॥ चिरंजीवी आह॥
वत्स अकर्षयनर्हि सामादीन्नतिक्रम्य यो मया पंचम उपायो निरूपितः॥ तत् मां विपक्षं कृत्वा तिविष्टु १०३

र्थवचनैर्निर्भर्त्स्य यथा विपक्षप्रणिधीनां प्रत्ययो भवति॥ तथा समाहृतरुधिरेणालिप्य मां न्यग्रोधस्याधः प्र
क्षिप्य गम्यतां पर्वते ऋष्यमूकं प्रति सपरिवारस्तिष्ठ यावदहं सपत्नान् सुप्रणीतेन विधिना विश्वास्य
भिमुखान् कृत्वा कृतार्थो ज्ञातदुर्गमध्यः दिवसे तानंधतानंधतां प्राप्तान् वानीत्वा व्यापादयिष्यामि॥
ज्ञातं मया सम्यक्कृतान्यथा सिद्धिर्न स्यात्॥ म च्याकृत्वा यतो दुर्गमित्यपादपाकसारर हितं केवलं व
धाय भविष्यति॥ उक्तं च॥ अपसारसमायुक्तं नयज्ञैर्दुर्गमुच्यते॥ अपसारपरित्यक्तं दुर्गव्या
जेन बंधनं॥ न च त्वया अस्मदर्थे कृपा कार्या॥ उक्तं च॥ अपि प्राणसमा नित्यं सम्यक् प्रतिपालि
तान् लालितानपि॥ भृत्यान् युद्धसमुत्पन्ने पश्येन्नानामिव शुष्कं॥ तथा च॥ प्राणवद्रक्षय
भृत्यान् स्वं कायमिव पोषयेत्॥ सदैक दिवसस्यार्थे यत्र स्यात् रिपुसंगमः॥ तत्त्वया नात्र विष
ये निषेधनीयः॥ इत्युक्त्वा तेन सह शुष्ककलहं कर्तुमारब्धः॥ अथान्ये तस्य भृत्याश्चिरंजीविनमु
च्छृंखलवाचा जल्पंतमवलोक्य तस्य वधाय ग्रहं नामघवर्णेनाभिहिताः॥ अहो निवर्तयत यूयं॥
अहमेवास्य शत्रुपक्षपातिनो दुरात्मनः स्वयं निग्रहं करिष्यामि॥ इत्यभिधाय तस्योपरि समारुह्य ल

।रवा०॥ घुवंचुप्रहारैस्तैनिहत्याह्नमरुधिरेणस्नावयित्वा यथा निर्दिष्टं स परिजनो गतः। अत्रांतरे कालिक
याहिपस्य प्रणिधिस्तया सर्वं तदमात्यव्यसनं मेघराजस्य ग्रामनं तत्उलूकराज्ञे निवेदितं। यत्र वारिः संप्र
तिष्काणि सीतानालीतपरिवारश्च प्रचलितः। उलूकोऽपि तदाकर्ण्य अस्तमनवेलायां सामान्यपरिजनो
वायसवधार्थं प्रचलितः। प्रास्त्र। यदहो ध्वर्यतां शीतः शत्रुः पलायनपरः पुण्यैर्लभ्यते। उक्तं
च। शत्रोः प्रचलने छिद्रमेकमन्यच्च संश्रयं। कुर्वाणो जायते तत्र व्यग्रत्वं राज्ञः सवितेनाः। न
वच्छिद्रं विना शत्रुर्देवानामपि सिद्ध्यति। ति। छिद्रं शक्रेण संप्राप्य दितेर्गर्भो विदारितः। ए
वं ब्रुवाणाः समंतान्न्यग्रोधपादपमधः परिवेष्ट्य व्यवस्थिताः। यावन्न कश्चिद्दृश्यते तावत्
ततश्च शाखाग्रसमारूढो हृष्टमनाः कृत्य मानो वंदिभिः उलूकराज एतदुवाच। अहो ज्ञायतां तेषां
मार्गः। यत्कतमेन मार्गेणैते प्रनष्टाः काकाः। तद्यावद्दुर्गं समाश्रयंते तावदेव पृष्ठतो गत्वा व्यापाद्या
एवं ति। उक्तं च। हन्तिमध्यास्थितः शत्रुरवध्यः स्याज्जिगीषुणां। किं पुनः संस्थितो दुर्गे सामग्र्या परयायु
तः। अस्मिन्नवसरे चिरंजीवी मंदं शब्दमकरोत्। तत् श्रुत्वा सर्वैः उलूकैः तस्य वधार्थं प्रजग्मुः। २०४

अथ तेनोक्तं। अहो अहं चिरंजीवी नाम मेघवर्णमंत्री। मेघवर्णेनेदृशीमवस्थां नीतः। तन्निवेदयध्व
मात्मनः स्वामिनो। तेन सह बहु वक्तव्यमस्ति। अथ तैर्निवेदितः स उलूकराजा विस्मयाविष्टस्तत्
क्षणं गत्वा प्रोवाच। त्वां किमेतां दशां गतः। तत्कथ्यतां। चिरंजीवी आह। देव श्रूयतामेतावदिति स
दराना मेघवर्णो युष्मत्व्यापादितप्रभूतवायसानां दृष्ट्वा दुःखाकोपपरिकोपशोकग्रस्तो यु
द्धार्थं प्रचलित आसीत्। ततो मया निषिद्धः। तं। स्वामिन्न युक्तं तव तैः सह परिग्रहं। उक्तं च। बली
यसा हीनबलो विरोधं न भूतिकामः मनसापि वांछेत्। न वध्यते वेतसवृत्तिरत्र व्य
क्तं प्रनाशो हि पतंगवृत्तेः। तत्तस्मै प्रदा नं कृत्वा संधिर्विधीयतां। उक्तं च। बलवंतं रिपुं दृष्ट्वा
सर्वस्वमपि बुद्धिमान्। दत्वा प्ररक्षयेत्प्राणान् रक्षितैस्तैर्धनं पुनः। न तच्छ्रुत्वा तेन दुर्जनजनप्र
कोपितेन त्वत्पक्षपातितेनमां शंकमानेनात्मेदृशीं दशां नीतः। तत्तव पादाः सांप्रतं मे शरणं। किं ब
हुना विज्ञापनया यावदहं प्रचलितुं शक्नोमि ताः तावत्त्वां तस्याश्रये नीत्वा सर्ववायसक्षयं वि
धास्यामि। अथारिमर्दन एतदाकर्ण्य पितृपितामहानामहामविमातं उवाच। रक्ताक्षः क्रूराक्षो दीप्ताक्षो वक्र

पाखाप नाशः। पतितस्य च चारः स विवाः एकत्र स्थानेऽपि कार्यमंत्रितवान्। ततश्चादौ रक्ताक्षं दृष्ट्वा तेन। स दृष्टा
वैदेषु स्म स्य रिपोर्मंत्री मम दृष्टः। तात किं क्रियतां। स आह। देव एष तस्य प्रधानमंत्री यद्यपि बला
त्स्तुत्यः तथापि गुणी। उक्तं च। जितेन्द्रियो जितः। तदप्यस्य वाक्यं श्रोतव्यं। नासौ मम सदर्थं प्र
त्यथा करिष्यति। यतोऽनेन देवविग्रहस्य   कोऽनर्थ इति ज्ञात्वा। उक्तं च। कोऽत्र राज्ञोऽयं निद्राचन
विलासस्य च स्पृहा। विग्रहस्य सङ्कविना   कंमरति। यत्पि ज्ञायते। तस्मादस्य हारेणेतनम
हमात्मा सुखेन वर्त्तितव्यं। उक्तं च।   सामादिदण्डपर्यन्ता नयः प्रोक्तः स्वयंभुवा।।
तेषां दण्डस्तु पापीयान् तं पश्चाद्विनियोजयेत्।   यत्नान्नया च सामसिद्धानि कार्याणि विकृतिं
ति न कचित्। सज्जनानां मनांसीव रत्नवंतीव   मृदमदा। सामसाध्येषु कार्येषु यो दण्डं योजयेद्बु
धः। संपन्नं शर्करा साम्यं पटोलं कटुकं पिबेत्। यतः केचित् त्वेवं वदंति। यत्न मात्रवादं दण्डसाधक
स्फा। न सामसाध्यस्य वदण्ड युक्तं। उक्तं च। पर्जन्यो ह्यनपिश्रुत्य त्रस्यति हरिणास्त्र्यो तः प्रिमाश्रात्र
वध्याः। लस्तु ज्ञकिः परेण सर्वदा। अन्यच्च। गात्रो रुदैर्वदन्तार्थायत्न साम्नि। अस्य स्यन्यपि दोषध्नं। द्वयं तदिम १०५

पतितं किं न दह्यति पद्मिनी। तद्यदि मद्वचः प्रमाणं। तत्सन्धानाय वधाय चारिपोः सामप्रयोक्तव्यं।
यतो नीतौ व पक्षं। शत्रोः शर्दमेषु पादो हता नु कंपय। अहो जलचरः प्राणी बकः परम
धार्मिकः। एवं तस्याभिप्रायं बुद्ध्वा कुरा कुमारः। तदहं तवाभिप्रायमपि ज्ञातुमिच्छामि। एवंविध
रूपे समुपस्थिते किं मम कर्त्तव्यं भवति   मन्त्री आह। यद्देव तेन निम   र्गविरिणा यज्ञं मप्रये
जितं तन्मम न श्रितित्वाति। उक्तं च। वत्तु   त्यपायसाध्ये शत्रौ सामैव प्रक्रिया। स्वच्छ
माम हतं प्राज्ञः कोऽस्त्र मापरिषि   वति। तद्दण्डसाध्येऽपि शत्रौ परिभूतं भवति। उक्तं
चाश्रपिवा। यतिकुटः शत्रुर्यानात   दिना सिद्ध्यति। तस्मात् रुदः प्रयोक्तव्यः शत्रुं नाविजि
जिगीषुणा। असाध्यं शत्रुमालोक्य दा   यादंतस्पर्शेदायतं। राज्यकामं समर्थं वयथा रामो
विभीषणं। कटले खिड्डा नाशोऽगर्जि पाय तत्र शत्रुप्रकल्प्य। प्रधानपुरुषे यद्वद्विद्धि मुग्धेन राक्षसः।
स्तिद्यपुरबलं ज्ञात्वा उत्थित्य मपितद्वतः। यतः सुखेन तन्यन्नगुणाक्षीसंसुदा रुवत्। एवं ज्ञात्वा
विवेकिना शत्रुसाधनायादः प्रयोक्तव्यः। सर्वविजिगीषुणापुक्तोऽपि शत्रुसाधनायेन

91/1953

व्याख्या॰ दात्त्ववर्द्धमानवति। अल्पस्यापि वि॰दनस्यतृष्णेनापिवाक्पणा। अन्तर्निर्भिन्नसंप्रापामोक्ति
केनापिबंधनं। तद्धि ममैतन्मतुष्टीयते। नथायापक्षेपेदारदयः। परपक्षेप्रयोक्तव्यः। एवंत
स्याभिप्रायंविदित्वादीनाक्रमाद्। तदात्रविषयेतवक्ताः इतिप्रायः। सत्त्रह। देव। ममस्मामसादा
द्दावपिनप्रतिज्ञा। सात। यानानसामृति ष्टदनतथाशत्रुर्नसिध्यति। पथाउपप्रदानलुब्धः। यथा
उपप्रदानेनविश्वास्यवध्यस्यात्। तदुक्तं ब्रह्मलोका। विष्टानराविश्वंवीक्षतेतनसर्वात्पदं। उच्छ
पउपतिमाजीरायते। नलकूटा इति। शत्रुंवांछतिघातायबुद्धिर्युक्तामहीप
तिः। सामान्यनय॰तिसि। स्यनततथे। वार्थमहोदधः। अपिस्यात्पितृहावैरीसोऽपिदा
नविलोभितः। गत्वाविश्वासतांवेमशत्रो राज्यासमर्पयत्। उग्रह्यः अपिवध्यंतशत्रविदाना
संश्रयात्स्वल्पमोसप्रदानेनकिंवार्त्तिमयो यथा। अपरंशत्रारूपप्रदानंवर्जयेत्। तदप्युक्तु
क्तं। यत्नउपप्रदानव्याजात्तशत्रुर्निर्मूलतांयाति। तदुक्तं। वर्तेनेत्तेघमपिविद्धं। सावर्द्धयंत्यरिमक
दा। गुडेनवर्द्धितः श्लेष्मायेतानिःशेषतांव्रजेत्। एवंतद्ववनमाकर्ण्यविक्रमनाशमूर्वालोनिव १०६

द्यतामात्मनोभिप्रायः। सत्त्रह। देव। किंवदामियत्त्वयाणामप्येषांमध्यात्केनापिनीतिशा
स्त्राश्रयमतिहितं। अत्राच्छशाक्तानामतसामैत्तादोपप्रदानोपायाः। शाक्तानां पुनः शत्रुविष
यदंडएवा। तदुक्तंवादंडमुक्त्वानृपोपायाः स्यात्पापायातायोजायद्विपाः। समेतेतामिवद्मावाछि
रतंप्रतिभवति। अपरंसामादिभिर्या लक्ष्मीर्गृह्यतेदंडंविना। सालक्ष्मीष्टिरंनप्रभवति।
तदुक्तंवाऽकृत्यापिरुषेयाश्रीर्विका मिन्यपिकिंतया। जरदंडवाः पिवाश्रातिदिवाडपग
तेदृणं। मनसासचलोकानां ल क्ष्मीर्दृष्टमतिवद्धि। कर्मणाद्यमदंडानामेवं।
स्याद्दशावर्तिनी। दुर्लतःश्रीवविवि नलक्ष्मीः संसक्ष्मताःलसः। एणपत्त्रीवायंतिष्ठ
वद्गुद्धवीर्यधनप्रदः। किरीटमणिविवि गुमूर्द्धशत्रानरश्मिगुणादत्तां विपत्तांपादंपुरुषः।
श्रियमश्रुते। हलाक्लष्टसस्कुरन्मृषक्रीडांगांशुपरिपिंजरैः। श्रीमहत्करिकराकारराहार्यंत
स्युजैः श्रियः। पराक्रमपरामर्षवशीकृतरिपोः स्मृता। लक्ष्मीरन्यांकसुप्तेवश्रयेयारदंडा
डंबिनी। शत्रो। श्रियं महोसाया सिंहीवहस्तिंसमाश्रितः। कवयग्राहणेजीतडर्वनीता। मिवश्री

93/1953

वा.ख.

ये॥ एवं चतुर्थीचक्रनाशमंत्राद्भेदः साध्यः। ततस्तस्यापि चक्रः समाकर्ण्य प्राकारकर्मस्थदासीनं
छेदंसविचमाह। लाः स्थिधीयतामात्मनः स्थिप्रायः। सश्चाह। देव अबुध्यः यं विशेषात्र वप
श्चाश्रयः शरणागतश्च। तादृशं तं छेदयितुंगनीचा मन्त्रा न्यूतनोऽस्ति नाग्रसरणाशत्रवो व्यापादनी
याः स्फः। तच्चकं च। मंत्र्या मत्स्य सुपादात्र। ज्ञातिज्ञातिसंस्तवः। रावणस्य भ्रिंदीयरामाद्विना घणम
योजयत्। अपरमस्य वधान्मरत्यात कम्लश्चोतत्कं च। वदस्युदित्यं शरणागतेषु। बहुज्ञ
का रक्षत्यनत्रु ज्ञाः। दयाविद्वी नाः प्रहरं नियत्रातरो रवादीनि निमिषुवयेति।
अपरो दक्षिणादिस्समृद्धस्य घातिमथ स्ययत्फलं। तत्फलं लक्ष्तेसम्पक्कयोरकृतघ्ना
रणाज्ञातं। एवं एवमः प्राकारकर्मस्थमं त्रः। अथ तस्य तदाकर्ण्य द्वियमरिमर्दनाः प्रतिदि
नुवान्। तामममाप्य यमस्थिप्रायः। एषतावक्कपदीनभवति। मदर्थं स्वामिना निरस्कृतः। तच्छु
श्युतेच्छेदं गंतुं। शुक्रसुक्कं प्राकारकार्मिना। यदि उनरेष सख्यातदत्येते वा। ततः कृतघ्नता
प्राषा भवति। तथा वा। ब्रह्मघ्ने च सुरापे वा चौरे भग्नव्रते तथा। निःकृतिर्विहिता सद्भिः कृतघ्ने १०७

च विचोषतः। एवं विचिंत्य स्थिरजीविनं स्वदुर्गमानेतुमारब्धाः॥ आनीयमानः स्थिरजीवि आह। दे
वाधाकिं चिकारणं तस्य स्थेन किमयोपसंगृह्णते नयत्कारणं मिदंदी नं वद्धं। मत्तु प्रवेष्टुतदहं सिमामुद
र्तुम। ग्निप्रदानेन तेन। एकात्तस्तस्यैगितम्भावं ज्ञात्वा ब्रवीत्किमर्थमग्निपतनमिच्छसि। स आह। अहं ता
वदर्थेऽहमामापदं मेघवर्णेन प्रापितस्तद्वैच्छामि रयापनार्थमुकत्वमिति। ततः श्रुत्वा राजनीतिकुशलोर
क्ताक्ष आह। भद्र कुटिलत्वं कृतकवचनश्चतुरश्चतत्त्वमुल्लूकयोनिगतोऽपि स्वकीयामेव वायसयोनिं ब
हुमन्यसे। देवस्ववंशाविना वायसस्व दुर्गमुपनीतः। नीयमानश्चावलीनमवदत्स्व स्थिरजीवि व्यचित
यत्। हन्यतामिति येनोक्तं स्वामिना हितमिच्छता। स एवैकोऽत्र सर्वेषां नीतिशास्त्रार्थतत्त्ववित्। तद्यदि त
स्य वचनमकरिष्यत् तेतो न स्वल्पोऽप्यनर्थो भविष्यदेषां। अथ दुर्गद्वारं प्राप्य अरिमर्दनोऽब्रवीत्। भो हि
तैषिणोऽस्य स्थिरजीविनो यथासमीहितं स्थानं प्रयच्छ्यतां। तत्श्रुत्वा स्थिरजीवि व्यचिंतयत्। मया ताव
देतेषां वधोपायश्चिंतनीयः स च मध्ये न न साध्यते। यतो मदीयमिंगितादिकं विचारयंतस्ते सावधाना
भविष्यंति दुर्गद्वारमेवाश्रितोऽभिप्रेतं साधयामीति निश्चित्य उल्लूकपतिमाह। देवयुक्तमिदं

95/1953

पंचा.
१०८

यत्स्वामिना प्रोक्तं परमहमपि नीतिज्ञस्तेदितस्त्वायथप्पुनरक्तःप्युचितस्तथापि तेसेवकास्ते प्रकाममा
हारंकृत्वा उलूकाराजादेशा दत्तकृष्टमांसाहारस्थिरंजीविने प्रयच्छंति। अथकतिपयैरेवदिवसैर्म
यूरइवसबलवान्संवृत्तः॥ अथरक्ताक्षःस्थिरंजीविनं पोष्यमाणं दृष्ट्वा सविस्मयो मंत्रिजनं
चमत्याह॥ अहोयमंत्रिजनो भवांश्चैवमहमेवगच्छामि॥ उक्तंच॥ पूर्वंतावदहंमूर्खो द्वितीयः
पाशबंधकः॥ ततोराजाचमंत्रीचसर्वंवैमूर्खमंडलं॥ तेप्राहुः॥ कथमेतत्॥ रक्ताक्षःकथयति
अथ अस्तिकस्मिंश्चिदधिष्ठाने पर्वतैकदेशेमहावृक्षस्तत्रचकेपिपक्षिणःप्रतिवसंति
स्म। यस्यपुरीषेसुवर्णमुत्पद्यते॥ अथकदाचिदुद्दिश्यव्याधःकोपिसमाययौ। सचपक्षी
तदग्रतएवपुरीषमुत्ससर्ज॥ अथपातसमकालमेवतत्सुवर्णीभूतं। दृष्ट्वाव्याधोविस्मयम
गमत्॥ अहोममशिशुकालादारभ्यशाकुनिबंधव्यसनीनोसीतिवर्षा। एवंसमभुवन्नक १०८
दाचिदपिपक्षिपुरीषेसुवर्णंदृष्टमितिविचिंत्यसरस्तेपाशांबबंध। अथासावपिपक्षीमूर्खोविश्वस्त स्च
चित्तोयथापूर्वमुपविष्टस्तत्कालमेवपाशेनबधःव्याधस्तंपाशादुन्मुच्यपंजरकेसंस्थाप्यनि

जगामसंनीत्वाचिंतयामास। किमनेनसापायनेनाहंकरिष्यामि। यदिकदाचित्कोप्यमुमीदृशंज्ञात्वाराज्ञेनि
वेदयामीतिविचिंत्यतथानुष्ठितवान्। अथराजापितंपक्षिणंदृष्ट्वाविकासितवदनःपरांतुष्टिमुपागतःप्रा
ह। हहो आरक्षकपुरुषाःएनंपक्षिणंयत्नेनरक्षत। अशनपानादिकंयथेच्छंप्रयच्छत। अथमंत्रिणाभि
हितं। किमनेनाश्रद्धेयव्याधवचनमात्रप्रत्ययपरिगृहीतेनांडजेन। किंकदाचित्पक्षिपुरीषेसुवर्णंभव
तितन्मुच्यतांपंजरबंधनादयंपक्षी। इतिमंत्रीवचनाद्राज्ञामोचितोपक्षीउत्तुंगतोरणद्वार
समुपविश्यसुवर्णमयींविष्टांकृत्वापूर्वंतावदहंमूर्खइत्यादिश्लोकंपठन्यथासुखमा
काशमार्गेणप्रायात्। अतोहंब्रवीमिपूर्वंतावदहंमूर्खमित्यादि॥ अथतेपुनरपि
प्रतिकूलदैवतयाव्याहतमतयःरक्ताक्षवचनमनादृत्यभूयस्तंप्रभूतमांसादिविविधा
हारैःपोषयामासुः। अथकाकःसर्वानात्मपरहःप्रोवाच॥ अहोएवदेवास्मद्भूपतेः
कुशलंदुर्गं। तदुपदिष्टंमयाकुलक्रमागतःसचिवोभिधत्तेतद्यथमन्यपर्वतदुर्गंसंप्र
समाश्रयामः। उक्तंच। अनागतंयःकुरुतेसशोभतेसशोच्यतेयोनकरोत्यनागतं। वने

97/1953

पंचा·
२०९

वसन्नेव जरामुपागतो न बिलैर्वस्ये च न कदापि हि श्रुता॥ ते प्रोचुः कथमेतत् सोऽब्रवीत्॥ अ
स्ति कस्मिंश्चिद्वने खरनखरनामा सिंहः कदाचित् परिभ्रमन् न सत्वं नाससाद। ततोऽस्तसमये महती
गुहामासाद्य चिंतितं रात्रौ अस्यां केनापि नागंतव्यं निभृतः तिष्ठामि। अथ गुहास्वामी दधिपुच्छो नाम शृगालो
द्वारि स्थित्वा उच्चैर्मारेण अहो गुहे अयोपि नाषतना भो किं न स्मरसि यन्मया सह समयः कृतोऽस्ति यन्मया बाह्यादागतेन त्वं वक्तव्या
चाहमाकारणीय इति मां नाह्वयसि ततोऽहमन्यं बिलं यास्यामि तत् श्रुत्वा सिंहश्चिंतितवान् नूनमस्यागतस्य एषा गु
हा सदा समाह्वानं करोति परमद्य मद्भयान्न किंचिद्ब्रूते युक्तं चैतत्॥ भयसंत्रस्तमनसां हस्तपादादिकाः क्रिया
प्रवर्तंते न वाग्वाणी वेपथुश्चाधिको भवेत्। तदहमस्याह्वानं करोमि येन तदनुसारेण प्रविष्टोयं मे भो
ज्यतामेति। एवं संप्रधार्य सिंहस्तस्याह्वानमकरोत्। अथ सिंहशब्देन गुहा प्रतिरवेणान्यानपि दूरस्थजीवा
न्त्रासयामास। शृगालोऽपि पलायमानो इमं श्लोकमपठत्। अनागतमिति। तदेवं मत्वा युष्माभिर्मया २०९
सगम्यतां। इत्येवमवधार्य आत्मानुयायिपरिवारानुगतो रक्ताक्षो दूरदेशांतरं जगाम। अथ रक्ताक्षे ग
ते स्थिरजीवी हृष्टमना व्यचिंतयत् अहो कल्याणं मे जातं रक्ताक्षो गतः स दीर्घदर्शी एते च मूढमनसः ततो मे सुखे

सुवध्यमे संजाताः। उक्तं च। न दीर्घदर्शिनो यस्य मंत्रिणः स्यान्महीपतेः। क्रमायाता ध्रुवं तस्य न
चिराद्याति परिक्षयः। अथवा साध्विदमुच्यते। मंत्रिरूपा हि रिपवः संभाव्या प्रविचक्षणैः। ये संतं न
यमुत्सृज्य सेवंते प्रतिलोमतः। एवं विचिंत्य स्वकुलाये वनकाष्ठिकैकां दिनं प्रति प्रतिक्षिपति गु
हाप्रदीपनार्थं न वा तत्सूर्पा उलूका जानंति। यदेषः कुलायमस्माकं द्योतननाय हृष्टः हिनयति। अ
साध्विदमुच्यते। अमित्रं कुरुते मित्रं मित्रं द्वेष्टि हिनस्ति च। शुभं वेत्त्यशुभं पापं भद्रं दैवहतो
नरः। तथा च। कृतं न पश्यत्यबहुज्ञानी दिवाप्रतीतवत् नः बुद्धयः कुर्गामिन्या तवं
ति महतामपि। अथ प्रभूत काष्ठसंग्रा कुलायन व्याजेन रचितः दुर्गद्वारि स्थिरजीविना संजा
तः। अथ तंमुह्यचिंक्य चिरंजीवी कृतः सूर्योदये घवर्णमादाय गवनदाघ साधक तास
मगुहा। तत्सर्वपरिवारः संमम्य एकैकं वनकाष्ठिकं ज्वलंती प्रातः तत्प्रीत्या ता गुहा द्वारे स्वकुला
येप्रक्षिपेत्। येन सर्वे शत्रूणां कुंभपाकेन रक्षणोपायो भवति। ततश्च वाप्रहृष्टो मेघवर्णश्चास
तानकथयत् ततश्चिरं दृष्टोऽसि। सत्त्वाद्रावज्ञानाय कालो विक्रमस्य। यतः कदाचित्तस्या

99/1953

धारवाप रिपोः कश्चित्प्रणिधिः समागमनं निवेदयिष्यति। ततः ज्ञानादेतोः प्यपसरणमन्यत्र करिष्यति। तन्न वर्ण्यतां शत्रु
ङ्कं च। शीघ्रकृत्येषु कार्येषु विलंबयति यो नरः। तत्कृत्यं देवतास्तस्य कोपाद्विघ्नयन्ति। तथा च। यस्य य
स्यादि कार्यस्य सफलस्य विशेषतः। क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसं। तद्देवायातः स्वदूतः श
त्रोः सविस्तरं निर्व्याकुलतया कथयिष्या मि। अथ स्थानस्था कर्म्मसपरिजनः किंकोऽहलंतीका।
क्षिकां वंचयित्वा गृही चात तुहाद्वारं प्रा प्यरिरंजी विकलाय प्रक्षिप्रवान्। तृतीयस्मार्व दिवाध
वक्रनाशमंत्रिवाकस्मरंत। द्वार आगतश्चाः इतिः सरंता गुहामध्ये कंपीपाकस्या
पायमापन्नाः। मृताश्च। एवं शाल्मलिः श पतानीश्वाशृयोः पिमेघवर्णस्त्वामव नये पोधपाद्पड
र्गगतः। प्रमुदितमनाः सुखेवापविष्टः सभा मध्ये चिरंजीविनमपृच्छत्। यत्तातत्वया कथं शत्रुगतेन
एतावत्कालोनीतः। तदत्र कौतुकमस्माकं वर्त्तते। तत्कथ्यतां। स आह। आगामिफलवांछया देव
कष्टमपि सेवद्भिर्नज्ञायते। उक्तं च। उदयकारियोतावुः। सेकेनापि मतंज ननविडषा कालांतर
प्रषिणा वस्त्रखंरखलवज्रपातविषमेन्दुदिःपिपापतेन। दर्वीव्यग्रकरेणधूममलिना कान्ताऽसर
ग्धमकिंपीमसातिबलेन मत्स्यलवेनेपानसंघट्टिता। तथा च। कार्यस्यापेक्षया भुक्तं विषम
प्यमृतायते। सर्वेषां प्राणिनां यत्र नात्र कार्यविचारणं। अन्यच्च। मिष्टिवांछयमाज ननविडषा
ताजा निगृह्यापकं। सचेश्मारव नापि दिवगा निष्ठुष्ठित्वेयप कार्यं बुधः। देवं इह विणापमिर्वकृग
णिरस्य र्विता। प्राष्टपिः किंस्पिष्टः सुचिरं चिरा टं तवनेपूर्वं न धर्मान्स्मितः। तथा च। कृपणा प्रतिमन
त्रवमयुणिः स्थाष्टकाले ज न्ननायां तव्याति दिनानि दिवघशेना शृयाधनंचां छमा। स्मिरंध्रीतवि
गर्हिता भुवतिनिः मांक्षपमाज्ञा तयाम् शिपदा किलमत्स्यराज नवेन घृष्टं न किंवं।
दंनानत्सात्व विज्ञयोजवति। व्याधमाना। भापिसमस्त्रेचं। कार्यं साधयति। उक्तं च। मदच्चाम।
तेन्मक्ततो नयालंबित धारिणां। नमुच्यतियदा रंतं प्राज्ञः पिवसमानादेयं। तथा च। प्रारभ्यतेन खलु
विघ्नभयेन नीचैः प्रारभ्यविघ्नविहता विरमंति मध्याः। विघ्नैः सहस्रगुणितैरपि हन्यमानाः प्रार
ब्धमुत्तमगुणाममपरित्यजंति। मेघवर्णस्त्वाह। तत्कृतंति। कंटकामराज्यं। शाल्मलिः। शापतानय
नाश्चया। अथवा प्युक्तमिनत। नथवादिनां। उक्तं च। कृपणेनोपमर्शितोऽपि च। शत्रुनोपेनाप्यवव॥ १७ ११०
101/1953

काखा० पुनः पुनः प्रवर्द्धते तस्मात्तच्छेषं न धारयेत्। तन्नास्ति च समोः स्वामंत्री बुद्धिमात्र। येन चाश्रमो स्व
विना पितृबुद्ध्या शत्रवो हताः। अथवा साधिदमुच्यते। शास्त्रैर्हता अपि रिपवो न हता भवंति। प्रज्ञा
हताश्च नितरां सुहता भवंति। शास्त्रं निहंति पुरुषस्य शरीरमेकं प्रज्ञा कुलं च विभवं च यशश्च हंति।
विरलीभावं सादवमतापि राभवं प्ये भवि। पादद्विसुवकः। वयं पुनर्मूकाः कृत्वा तु मानमात्र।
उक्तं च। प्रसरति मनः कार्यारंभे दृढी भवति स्मृतिश्चाप्युपगमं याथि मित्रान गच्छति
विलसं च कलति सकलं बोद्धस्त्वं विभेम पुनरपि मनस्को न भवति चरनिःस्वारोघ्याः
न रस्य न विषमस्य तन्मत्र न विषमो विपद्य स न विमलोऽति। बुद्धिविपर्यासेन ज्ञातं मया
यथा विज्ञासमर्थंति पुरुषापामोन विषमता मन विष्णतावन विष्णतो व्यवहारादेव जानंति। उक्तं च
वांछिं च स्तुवयति श्रवनं न विपंधुसाः स्व जन्मपुकल्पं यदि चेतरं च। विज्ञायते शिष्टरजा सकला
पूर्विकः प्रत्यक्षपदरूपसरतसरसः कलापी। तनु यस्य विधिः संमुखो भवति। स च मिव बुद्धिसं
पन्नो भवति। उक्तं च। न दैवायमिमादाय रक्षति पशुपालवत्। यं तु वर्द्धितुमिच्छंति सद्बुध्यायोज १११

यंति तं। न दैवा शस्त्रमादाय निघ्नंति रिपुवत्क्रुधा। यं तु हिंसितुमिच्छंति बुद्ध्या विप्लेषयंति तं।
बुद्ध्या कलुषं कृत्वा यो विनाशे पर्युपस्थिते। अनयो नयसंकाशो हृदयान्नापसर्पति। यथा तव
रिपोः संजाता बुद्धिविशेषः॥ समाप्तं चेदं काकोलूकीयं नाम तृतीयं तंत्रं॥छ॥ ॥छ॥ ॥
॥र्ष०॥ जैतामा॥ अथेदमारभ्यते लब्धप्रणाशं नाम चतुर्थं तंत्रं। यस्यायमादिमः श्लोकः॥ समु
त्पन्नेषु कार्येषु बुद्धिर्यस्य न हीयते। स एव दुर्गं तरति जलस्थो वानरो यथा॥ तद्यथा
नुश्रूयते। अस्ति कस्मिंश्चित्समुद्रोपकंठे महान् जंबूपादपः सदाफलः। तत्र च
रक्तमुखो नाम वानरः प्रतिवसति स्म। तत्र च तस्य तरोरधः कदाचित्करालमुखो नाम म
करः समुद्रसलिलान्निःक्रम्य सुकोमलवालुकासनाथे तीरोपांते निविष्टः। ततश्च रक्तमुखे
न स प्रोक्तः। भो भवानभ्यागतोऽतिथिः। तद्भक्षयतु मया दत्तान्यमृतकल्पानि जंबूफलानि।
उक्तं च। प्रियो वा यदि वा द्वेष्यो मूर्खो वा यदि पंडितः। वैश्वदेवांतमापन्नः सोऽतिथिः स्वर्गसंक्र
मः। न पृच्छेच्चरणं गोत्रं न च विद्यां कुलं न च। अतिथिं वैश्वदेवांते श्राद्धे च मनुरब्रवीत्। दूरमा

103/1953

ख्या०

मार्गश्रमश्रांतं वैश्वदेवांतमागतं। अतिथिं पूजयेद्यस्तु स याति परमां गतिं॥ एवमुक्त्वा तस्मै जंबूफलानि प्रय
च्छति॥ सोऽपि तानि भक्षयित्वा तेन सह चिरं गोष्ठीसुखमनुभूय भूयोऽपि स्वभवनमगात्॥ एवं नित्यमे
व तौ वानरमकरौ जंबूच्छायास्थितौ विविधशास्त्रगोष्ठ्या कालं नयंतौ सुखेन तिष्ठतः॥ सोऽपि मकरो
भक्षितशेषाणि जंबूफलानि गृहं गत्वा स्व पत्न्याः प्रयच्छति॥ अथान्यतमदिवसे तया स पृष्टो नाथ क्वै
वंविधान्यमृतकल्पानि फलानि प्राप्नोषि। स आह भद्रे ममास्ति परममित्रं रक्तमुखो
नाम वानरः स प्रीतिपूर्वकमिमानि फलानि प्रयच्छति। अथ तयाभिहितं। यः सदा
एवामृतप्रायाणीदृशानि फलानि भक्षयति तस्य हृदयममृतमयं भविष्यति। तद्यदि मया
भार्यया ते प्रयोजनं ततस्तस्य हृदयं मम प्रयच्छ। येन तद्भक्षयित्वा जरामरणरहिता त्वया सह भो
गान् भुंजामि। स आह। भद्रे मा मैवं वद। यतः स प्रतिपन्नोऽस्माकं भ्राता। अपरं व्यापादयितुमपि न श
क्यते। ततस्त्यजैनं मिथ्याग्रहं। उक्तं च। एकस्तोनप्रसूते वागित्यस्मिन् जननीत्वणां। वाग्जातमधि
कं प्रोचुः सोदर्यादपि बांधवात्॥ अथ मकर आह। त्वया कदाचिदपि वचनं मम नान्यथाकृतं। तन्नू ११२

नं सा वानरी भविष्यति। येन तस्या अनुरागतः सकलमपि दिनं तत्र गमयसि। तत्त्वं ज्ञातः सम्यङ्मा
या। यतः प्राह्लादं वचनं प्रयच्छसि न मानावांछितं किंचन प्रायः श्वसिषि द्रुतं। कृतं च हा
लासमये रात्रिषु कंठाश्लेषपरिग्रहशिथिलतां यन्नादरं चुंबने तेन त्वं धूर्तं हृदि स्थिता प्रियतमा का
चिन्मामिवापरा॥ सोऽपि पत्न्याः पादोपग्रहं कृत्वांकोपरि निधाय तस्याः कोपकोटिमाप
न्नायाः पत्न्याः सुदीनमुवाच। यन्मयि तेपादपतितः किंकरस्त्वामुपागतः प्रिये कामातु
रः कोपं कोतकोन्याः प तस्यति॥ सापि तद्वचनमाकर्ण्य अश्रुप्लुतमुखी
तमुवाच। सार्द्धं मनोरथशतैस्तव धूर्त कांता सैव स्थिता मनसि कृत्रिमभावरम्या।
अस्माकमस्ति न कथंचिदिहावकाशस्तस्मात्कृतं चरणपातविडंबनाभिः॥ अपरं सा
यदि तव वल्लभा न भवति। तत्किं मया भणितोऽपि तं न व्यापादयसि। अथ यदि स वानरः तत्
कस्तेन सह स्नेहः। तत्किं बहुना। यदि तस्य हृदयं न भक्षयामि। तन्मया प्रायोपवेशनं
कृतं विद्धि। एवं तस्यास्तं निश्चयं ज्ञात्वा चिंताव्याकुलितचित्तः सोऽब्रवीत्। अथवा साधु इदमु

143045

११२०१?

पारवा०॥ व्याघ्र॥ वह्नलेपस्य मूर्षस्य नारीणां कर्कटस्य च। एको ग्रहस्तु मीनानां नीलीमद्यपयोस्तथा॥ तत्किं करोमि
। कथं सामे वधमेतद्विष्यति। इति विचिंतयन् वानरपार्श्वमगमत्। वानरोऽपि चिरायातं तं सोद्वेगमवलो
क्य प्रोवाच। भो मित्र किमद्य चिरवेलायां समायातः। कस्मात् साह्लादं नालापयसि। न सुभाषितानि प
ठसि। स आह। मित्र अहं तव भ्रातृजायया नि ष्ठुरतरैर्वाक्यैरभिहितः। भोः कृतघ्न मा मे त्वं मुखं
दर्शय सि। यतस्त्वं मित्रं नित्यमेवोपजी व्य॥स्थ सि। न तस्य पुनः प्रत्युपकारं गृहदर्शनमात्र
मपि न करोषि। तत्ते प्रायश्चित्तमपि नास्ति। उक्तं च। ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते
तथा। निःकृतिर्विहिता सद्भिः कृतघ्ने नास्ति निःकृतिः। तत्त्वं मम देवरं गृहीत्वाद्य प्रत्युपका
रार्थं गृहमागच्छ। अथवा त्वया सह मम पर लोके दर्शनं। तदहं तयैवं प्रोक्तस्तव सकाशमागतः।
तदद्य तया सह कलहं कुर्वतो ममेयती वेला मे विलग्ना। तदागच्छ मे गृहं। तव भ्रातृपत्नी रचितचतु
ष्कप्रगुणितवस्त्रमणिमाणिक्याद्युचिताभरणा द्वारदेशबद्धवंदनमाला सोत्कंठा तिष्ठति। मर्कट आह। भो मि
त्र युक्तमभिहितं मद्भ्रातृपत्न्या। उक्तं च। वर्जयेत् कौलिकाकारं मित्रं प्राज्ञतरो नरः। आत्मनः सन्मु १२३

खं नित्यं य आकर्षति लोलुपः। तथा च। ददामि प्रतिष्ठाम्यापि त्वपापि परं किं तु वयं वनचराः। युष्मदीयं
जलांतगृहं। तत्कथमपि न शक्यते तत्र गंतुं। तस्मात्तामपि मे भ्रातृपत्नीमत्रानय। येन तस्याः प्रणम्या
शीर्वादं गृह्णामि। स आह। भो मित्र अस्ति समुद्रांतरे सुपुलिनप्रदेशे रम्यमस्मद्गृहं। तन्मम पृष्ठमारूढः सुखेनाकु
तोभयो गच्छ। सोऽपि तच्छ्रुत्वा सानंदमाह। भद्र यद्येवं तत्किं विलंब्यते त्वर्यतां। अहं तव पृष्ठमारूढः। त
थानुष्ठिते गच्छंतमगाधजले मकरमव लोक्य भयत्रस्तमना वानरः प्रोवाच। भ्रातः शनैः शनैः श
म्यतां। जलकल्लोलैः प्लावितं मे श रीरं। तदाकर्ण्य मकरश्चिंतयामास। असावगाधजलं
प्राप्तो मद्वशः संजातः। मत्पृष्ठगतस्तिलमा त्रमपि चलितुं न शक्नोति। तस्मात्कथयाम्यस्याभिप्रायं
येनाभीष्टदेवतास्मरणं करोति। आह च। मि त्र त्वं मया वधाय समानीतः। भार्यावाक्येन विश्वास्य। तत्स्मर्य
तामभीष्टदेवता। स आह। भ्रातः किं मया तस्यास्तवापि चापकृतं। येन मे वधोपायश्चिंतितः। मकर आह
। भो तस्यास्तावत्तव हृदयस्यामृतमयरसफलास्वादनमृष्टस्य तत्कृते दोहदः संजातः। तेनैतदनुष्ठि
तं। वानर आह। भद्र यद्येवं तत्किं त्वया मम तत्रैव न व्याहृतं। येन स्वहृदयं जंबूकोटरे सदैव मया सुगु

107/1953

रवा०

उक्तं। तत्कुत्रास्ते पत्न्या अर्पयामि। त्वयाहं शून्यहृदयोऽत्र कस्मादानीतः। तदाकर्ण्य मकरः सानंदमा
ह। भद्र यद्येवं तदर्पय मे हृदयं। येन सा दुष्टपत्नी तद्भक्षयित्वा अनशनादुत्तिष्ठति। अहं त्वां तमेव
जंबूपादपं प्रापयामि। एवमुक्त्वा निवर्त्य जंबूतलमगात्। वानरोऽपि तीरमासाद्य कथमपि जल्पित
विविधदेवतोपचारपूजस्तीरं समासादितवान्। ततश्च दीर्घतरं झम्पं कृत्वा तामेव जंबूपादपमारुह्य चिं
तयामास। अहो लब्धाः प्राणास्तावत्॥ अथवा साध्विदमुच्यते। उक्तं च श्रीमहाभारते। नवि
श्वसेदविश्वस्ते विश्वस्तेऽपि न विश्वसेत्। विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृंतति
तन्ममैतदद्य पुनर्जन्मदिनं संजातं। इति। चिंतयामास। अहो लब्धाः प्राणास्तावत्। अथ वासा
भिप्रायमुद्दिश्य तं मकरमाह। मित्र अर्पय तत् हृदयं। यथा तत्राष्टपत्नी तद्भक्षयित्वा अनशना
दुत्तिष्ठति। अथ विहस्य निर्भर्त्स्य च वानरस्तमाह। धिक् मूर्ख विश्वासघातक किं कस्यचित् हृदयद्वयं
भवति। तदाशु गम्यतां जंबूवृक्षस्याधस्तान्न त्वया पिच्छया आगंतव्यं। उक्तं च यतः। सकृद्दुष्टं च यो मित्रं पुनः
संधातुमिच्छति। स मृत्युमुपगृह्णाति गर्भमश्वतरी यथा॥ तच्छ्रुत्वा मकरः सविलक्षं चिंतितवान्। अहो मं ११४

याऽतिमूढेन किं मयास्य स्वचित्ताभिप्रायो निवेदितः। तद्यदि पुनरपि कथंचित् विश्वासं गच्छति। त
द्भार्यार्थं पि विश्वासयामि। आह च। मित्र हास्येन मया ते ऽभिप्रायो लब्धः। तस्मान्न किंचिद्विद्वद्धृदयेन
प्रयोजनं। तदागच्छ प्राघूर्णिकन्यायेनास्मद्गृहं। तव भ्रातृपत्नी सोत्कंठा वर्तते। वानर आह। गच्छ
गम्यतां। अधुनाहं नागमिष्यामि। उक्तं च। बुभुक्षितः किं न करोति पापं क्षीणा नरा निःकरुणा
भवंति। आख्याहि भद्रे प्रियदर्शनस्य न गंगदत्तः पुनरेति कूपं॥ मकर आह। कथमेतत
सोऽब्रवीत्। अस्ति कस्मिंश्चित्कूपे गंगदत्तो नाम मंडूकराजः प्रतिवसति स्म। स कदा
चिद्दायादैरुद्वेजितोऽरघट्टघटीमारुह्य निःक्रांतः। अथ तेन चिंतितं। यत्कथं तेषां दा
यादानां मया प्रत्युपकारः कर्तव्यः। उक्तं च। आपदि येनापकृतं येन च हसितं दशासु विषमासु।
अपकृत्य तयोरुभयोः पुनरपि जातं नरं मन्ये॥ एवं चिंतयन् बिले प्रविशंतं कृष्णसर्पमपश्यत्।
तं दृष्ट्वा भूयोऽप्यचिंतयत्। यदेनं तत्र कूपे नीत्वा सकलदायादानामुच्छेदं करोमि। उक्तं च। शत्रु
भिर्योजयेच्छत्रुं बलिना बलवत्तरं। स्वकार्याय यतो न स्यात्काचित्पीडात्र तत्क्षये। तथा च।

109
1953

पं०ख०॥ त्रुमुन्मूलयितुं प्राज्ञस्तीक्ष्णेनैव तीक्ष्णेन शत्रुणा॥ अथवा कारं सुखार्थाय कंटकेनैव कंटकं॥ स एवं परिभाव्य
बिलद्वारं गत्वा तमाह्वयत्। एह्येहि प्रियदर्शन एहि। तत् श्रुत्वा सर्पश्चिन्तयामास। य एष मामाह्वय-
ति। स स्वजातीयो न भवति। यतो नैषा सर्पवाणी। अन्येन केनापि सह मम मर्त्यलोके संधानं नास्ति। तद-
त्रैव दुर्गे स्थितस्तावद्वेद्मि। को ऽयं भवि- ष्यति। उक्तं च। यस्य न ज्ञायते शीलं न कुलं न च संश्रयः।
न तेन संगतिं कुर्यादित्युवाच बृहस्पतिः। कदाचित्कोऽपि मंत्रवादी औषधिधरो वा मामा-
हूय बंधने क्षिपति। अथवा कश्चि- त्पुरुषो वैरमाश्रित्य कस्यचिद्भक्षणार्थं मामा-
ह्वयति। आह च। भोः को भवान्। स आह। अहं गंगदत्तो नाम मंडूकाधिपतिः। त्वत्सकाशमभ्य-
र्थमागतः। तत् श्रुत्वा सर्प आह। भो अ- श्रद्धेयमेतत्। यत् तृणानां वह्निना सह संगमः। उक्तं च। यो
यस्य जायते वध्यः स स्वप्नेऽपि कथं व्रजेत्। तत्समीपमरेरेति तत् किमेवं प्रजल्पसि। गंगदत्त आह। भोः स-
त्यमेतत्। स्वभाववैरी त्वमस्माकं परं परपरिभवात् प्राप्तोऽहं तव सकाशं। उक्तं च। सर्वनाशे च संजाते प्रा-
णानामपि संशये। अपि शत्रुं प्रणम्यापि रक्षेत् प्राणान् धनानि च॥ सर्प आह। कथय कस्मात्ते प- ११५

रिभवः। स आह। दायादेभ्यः। सोऽप्याह। क्व ते आश्रयो वाप्यां कूपे तडागे ह्रदे वा। तत् कथय स्वाश्रयं। तेनोक्तं
पाषाणचयनिबद्धे कूपे। सर्प आह। अहो अपदा वयं। तन्नास्ति मम तत्र प्रवेशः। प्रविष्टस्य च तत्र स्थानं
नास्ति यत्र स्थितस्तव दायादान् व्यापादयामि। तद्गम्यतां। उक्तं च। यच्छक्यं ग्रसितुं ग्रास्यं ग्रस्तं परिणमेच्च यत्।
हितं च परिणामे यत् तदाद्यं भूतिमिच्छता॥ गंग- दत्त आह। भोः समागच्छ त्वं। अहं सुखोपायेन तत्र तव प्रवे-
शं कारयिष्यामि। तथा तस्य मध्ये जलोपांते र- म्यतरं कोटरमस्ति। तत्रस्थस्त्वं लीलया दायादान् व्याप-
दयिष्यसि। तत् श्रुत्वा सर्पो व्यचिन्तयत्। अ- हं तावत् परिणतवयाः कदाचित् कथंचित् मूषकमे-
कं प्राप्नोमि। तत् सुखावहो जीवनोपायो ऽयमनेन कुलांगारेण मे दर्शितः। तद्गत्वा तान्मंडूका-
न् भक्षयामीति। अथवा साधुरिदमुच्यते। यो हि प्राणपरिक्षीणः सहायपरिवर्जितः। स हि सर्वसुखो-
पायां वृत्तिमाचरिष्यति। एवं विचिन्त्य तमाह। भो गंगदत्त यद्येवं तत् अग्रे भव। येन तत्र गच्छामि। गंगदत्त आ-
ह। भो प्रियदर्शन अहं त्वां सुखोपायेन तत्र नयिष्यामि। स्थानं च दर्शयिष्यामि। परं त्वयास्मत्परिज-
नो रक्षणीयः। केवलं यानहं दर्शयामि त एव त्वया भक्षणीयाः इति। सर्प आह। सांप्रतं त्वं मे मित्रं जा-

111 / 1953

।स्वा० तां तत्रा मनव्यां नव बवानन तत्र स्कणीयस्त्रिदायादाः। एवमुक्त्वा बिलान्निःक्रम्य तमालिंग्य चेतत्निवमस्त्र
स्थितः। अथ कूपमासाद्य अरहट्टघटिकामार्गेण सर्पस्तेनात्मना निहितं। गङ्गदत्तेन निःशोषिताः स्वरिपवः। त
स्य यच्छान्यान्म किंविज्ञाजनं। यतोऽहं त्वयात्रानीतः। गंगदत्त आह। भद्र कृतं त्वया मित्रकृत्यं। तत्सांप्रतम
नेनैव घटिकायंत्रमार्गेण गम्यतामिति। सर्प आह। भो गंगदत्त न सम्यगभिहितं त्वया। कथमहं तत्र गच्छा
मि। मदीयं बिलदुर्गमन्येन विरुद्धं तद्विष्य तैः तस्मादेकं मंडूकं कंचित्स्ववर्गीयं प्रयच्छ नो
चेत्सर्वानपि भक्षयिष्यामीति। तच्छ्रु त्वा गंगदत्तो व्याकुलमना व्यचिंतयत्। अहो
किमेतन्मया कृतं सर्पमानयता। तद्यदि तन्न सर्वानपि भक्षयिष्यति। अथवा युक्तमुच्यते। अ
मित्रं कुरुते मित्रं मित्रवीर्याद्यधिकमात्मनः। स करोति न संदेहः स्वयं हि विषभक्षणं॥ त
त्प्रयच्छाम्यस्यैकं दिनं प्रति सुहृदं। उक्तं च। सर्वस्वहरणे युक्तं शत्रुं बुद्धियुता नराः। तोषयंत्यल्प
दानेन वाडवं सागरो यथा॥ तथा च। यो दुर्बलोऽणूनपि याच्यमानो बलीयसा यच्छति नैव साम्ना। प्र
यच्छते नैव च दर्श्यमानं खारीं स चूर्णस्य पुनर्ददाति॥ तथा च। सर्वनाशे समुत्पन्ने अर्द्धं त्यजति पंडितः। एवं १२६

निश्चित्य नित्यमेकैकमादिशति। सोऽपि तं भक्षयित्वा तस्य परोक्षेऽन्यानपि भक्षयति। अथवा साधु
दमुच्यते। यथा हि मलिनैर्वस्त्रैर्यत्र तत्रोपविश्यते। एवं चलितवृत्तस्तु वृत्तशेषं न रक्षति। अथान्य
दिने तेनापरान्मंडूकान् भक्षयित्वा गंगदत्तसुतः यमुनादत्तो भक्षितः। तं भक्षितं मत्वा गंगदत्तस्तार
स्वरेण धिक्धिक् प्रलापपरः कथंचिदपि न विरराम। ततः स्वपत्न्याभिहितः। किं क्रंदसि दुराक्रंद क्षय
कारकः। स्वपक्षक्षयकारकः। स्वजनानां कः करिष्यति। तदद्यापि विचिंत्यतामात्म
नो निःक्रमणं। अस्य वधोपायश्च। अथ गच्छता कालेन सकलमपि कवलितं मंडू
ककुलं। केवलमेको गंगदत्तस्तिष्ठति। ततः प्रियदर्शनेन भणितं। भो गंगदत्त बुभुक्षितो ऽहं
निःशेषिताः सर्वे मंडूकाः। तद्दीयतां मे किंचिद्भोजनं यतोऽहं त्वयात्रानीतः। स आह। भो मित्र
न त्वयात्र विषये मया अवस्थितेन कापि चिंता कार्या। तद्यदि मां प्रेषयसि ततोऽन्यकूपस्थानामपि मंडूका
न विश्वास्यात्रानयामि। स आह। मम तावत्त्वमभक्ष्यो भ्रातृस्थाने। तद्यद्येवं करोषि तत्सांप्रतं पितृस्था
ने त्वमसि। तदेवं क्रियतामिति। सोऽपि तदाकर्ण्य अरहट्टघटिकामाश्रित्य विविधदेवतोपकल्पितोप

118/1953

वा।रवा। याचितः स्मात्कूपाद्विनिःक्रान्तः। प्रियदर्शनोऽन्यकोटरनिवासिनी। गाथासुवाच। तदेहि क्रियतां प्राकृ
साद्। एवं। अथासह परिविवृत्तः स्वबन्धूनां मंडूकमध्ये विकलाङ्गयिंगंगदत्ता यमसंदर्शं कथ
य। यतनागम्य तामिष्या किना पितृतरं। यस्यान्यमण्डूका नागच्छंति। अहं त्वया विना नात्र वसितुं शक्नो
मि। तथाय त्वं हे त्वव विरुद्धमावरामि। ना। सुहृत्तमं तारमयाविधूतं। गाथापितद्वचनाद्गंगदत्तेऽ
ततरम्भिष्या तान्तद्गंगदत्तमनवस्थ। ह्मस्विये ह्युनिस्वमार्गसमीक्ष्यमाणा स्थितिः। मनु।
श्री। घ्रंगम्यता मिति। अपरं वते नतववि रूपकरणं सुहृत्तमंतारधूर्ता। तन्निःशोकनमनसा
गम्यतां। तदाकर्ण्य गंगदत्तआह। वत्तु स्थितः किं न रोतिपापमितिणा। एवमुक्त्वा सतां विसर्जया
मास। तन्द्रो इष्टजलचर अदम्पिगंगदत्त इवलम्पतवगृहेकथं विहृष्टापायोः पिचज्हे नयास्यापि
ततष्क्रत्वा मकरआह। त्वामित्रानिनम्भुज्य तेन कर्तुं। सर्वथैवामस्तवध्नतादोषमपनयमङ्गागमेन
न। अथवात्राहमत्रानशनं परिकरिष्यामि। वानरआह। मूढ किं अहं लंबकर्णो गर्दभः। तायोः दृष्ट्वा
पायमभिस्त्रियमवमंत्रवगच्छन्न्मृतः। मकर आह। तद्भवति कालं बकर्णो गर्दभः। कथं दृष्टापाया अपि ११३
आगतश्च गतश्चैव दृष्ट्वा सिंहपराक्रमं॥ लंबकर्णो हृदयोमूर्खस्तेन मम स्तु यैश्गत ... कर० कथं० काम०

मृतः। तन्निवेद्यतां। वानरआह। अस्ति कस्मिंश्चिद्वनोद्देशे करालकेसरो नाम सिंहः प्रतिवसतिस्म
तस्य च धूसरको नाम शृगालः सदैवानुयायी परिवारकः स्थिः। अथ कदाचित्तस्य हस्तिना सह युध्य
मानस्य शरीरे प्रहाराः संजाताः। यैः पदमेकमपि चलितुं न शक्नोति। तस्याचलनाद्धूसरकः क्षुत्क्षा
मकंठो दौर्बल्यं गतः। अन्यस्मिन्नहनि तमाव वनुगद्वामि नु बुभुक्षया पीडितोऽहं। पदात्पदमपि
चलितुं न शक्नोमि। तत्कथं त्वदभ्र षं करोमि। सिंह आह। तो गच्छान्वेषय किंचित्सत्त्वं यि
न एतदवस्थोगतोऽपि व्यापादयामि। तदाकर्ण्य शृगालोऽन्वेषयन् किंचित्समीपग्रा
मसमीपमासादितवान्। तत्र दीर्घकर्णो नाम गर्दभं तत्संदंगापान्तप्रविरल दूर्वांकुरानुह
श्या दास्वादयन् दृष्टः। ततश्च समीपे ह्या तेनाभिहितः। मामन्नमस्कारोऽयं मदीयः। संभाव्य
तां चिराद्दृष्टोऽसि। तत्किमेवं दुर्बलः। स आह। भगिनीसुत किं कथयामि। रजको तिनिर्दयः अति
रणामा दमयति। घासमुष्टिमपि न प्रयच्छति। केवलं दूर्वांकुरान् धूलिमिश्रितान् भक्षयामि। तत्को
ऽस्ति मे शरीरे पुष्टिः। शृगाल आह। मामन्नयद्येवं तदस्ति रमणीयतरं प्रदेशो मरकतसदृशशष्प

115/1953

प्रायो नदीस्नानार्था॥ तदागच्छ मया सह॥ येनसुरे तसुभाषितगोष्ठीसुखमनुभवावः। लंबकर्ण आह। भोस्त
गिनीसुत सत्यमुक्तं भवता। परं वयं ग्राम्याः पशवो ऽरण्यचारिणां वध्याः। तत्किं तेन भव्यप्रदेशेन। शृगाल
आह। मा मैवं वद। मद्भुजपरिरक्षितः स देशः। नास्ति कश्चिदत्र परः। परमत्र सन्ति तद्दोषेण रजककदर्थिता
स्तिस्रो रासभ्यो ऽनाथाः सन्ति। ताश्च पुष्टि मापन्ना यौवनोत्कटा इदं मामूचुः। यदि त्वमस्माकं सत्यो मा
तुलः। तदा किंचिद्ग्रामं गत्वा ऽस्मद्यो ग्यं कंचित्पतिमानय। एतदर्थं त्वामहं तत्र नयामि। अथ शृ
गालवचनान्निःशंकः कामपीडितो गर्दभमवोचत्। भद्र यद्येवं तदग्रेसरो भव येनागच्छामि। अथ
वा साधुरिदमुच्यते। नामृतं न विषं किंचि देकां मुक्त्वा नितंबिनीम्। यस्याः संगेन जीव्यते म्रियते च वि
योगतः॥ तथा च। यासां नाम्नापि कामः स्यात् संगमं दर्शनं विना। तासां दृक्संगमं प्राप्य यन्न द्रवति कौतु
कम्॥ तथा ऽनुष्ठिते शृगालेन सह सिंहान्तिकमागतः। सिंहो ऽपि व्यथाकुलस्तं दृष्ट्वा यावत्समुत्तिष्ठति तावद्रा
सभः पलायितुमारब्धः। अथ तस्य पलायमानस्य सिंहेन तलप्रहारो दत्तः। स च मन्दभाग्यस्य व्यवसाय इव
